84/8

८४/८

1256

अथ

तृचाविधानम् ।

Truchā Vidhanam

इत्यात्मरक्षां कृत्वा ॥ बीजेन रेचकपूरककुंभकैः प्राणाया
मत्रयं कृत्वा मूलेन वा कुर्यात् ॥ पुनर्वामे गुर्वादीन् नमस्कृत्य
दक्षिणे गणेशादीन् नमस्कृत्य अद्येत्यादि सप्तम्यन्तं परममंग
लरूपिणं मित्रादिद्वादशात्मकरूपं हरिहरविरिंचिस्वरूपि
णं सूर्यं विचिंत्य ॥ देशकालौ संकीर्त्य ॥ शुभपुण्यतिथौ दीप
शोभनतिथ्यादिश्च संकीर्त्य कृत्वा अस्य यजमानस्य अमुक
नामधेयस्य सर्वरोगापनुत्तये अर्घ्यदानांगभूतं सूर्यस्तुति
प्राणप्रतिष्ठापूर्वकं ध्यानपूर्वकं न्यासमहं करिष्ये ॥ ॥
अथ देवतासांनिध्यार्थं [illegible] उच्चारणं ऋषिश्च प्रतिमायाः ॥

॥ इति शिखां बद्ध्वा भूतानि निःसार्य मौ तिष्ठंति भू
पृ ति॥ भूतानाम विरोधेन ब्रह्मकर्म समारभेत्॥ अपस
र्पंतु० इत्यो॥ अपक्रामंतु भूतप्रेतपिशाचा ये भूमि भार
काः॥ सर्वेषां०॥ इति भूमौ वामपादघातत्रयं कृत्वा॥ तीक्ष्ण
दंष्ट्र महाकाय कल्पांतदहनोपम॥ भैरवाय नमस्तुभ्यमनु
ज्ञां दातुमर्हसि॥ इति क्षेत्रपालं नत्वा॥ पृथ्वीत्यामेरुपृष्ठ०
योगः॥ पृथ्वी त्वया० सनं॥ इति भूमिं संप्रार्थ्य॥ अनंतास
नाय०॥ विमलासनाय०॥ पद्मासनाय०॥ कूर्मासनाय०॥ म
ध्ये परमसुखासनाय०॥ भूर्भुवस्वरोमिति आसने सम्यगुपवि ॥४॥

रय॥ स्वच्छीरसि। गुरुतुभ्योनमः॥ पं परमगुरुभ्यो॰॥ दक्षि
णभुजे। दुं दुर्गायै॰॥ वामभुजे। गं गणपतये॰। दक्षिणजानौ
क्षं क्षेत्रपालाय॰॥ वामजानौ। सं सरस्वत्यै॰॥ हृदये ॐ आं
आत्मने॰॥ ॐ पं परमात्मने॰॥ प्रणवस्य परब्रह्म ऋषिः॰
यागः॥ प्राणायाम जपं कृत्वा॥ अथ तत्त्वारौ मातृकोप
संहारः॥ क्षंकारं लंकारे संहरामि॥ लंकारं हंकारे सं॰ हरा इसाति १
मि॥ हंकारं लंकारे संह॰॥ संकारं षंकारे संह॰॥ षंकारं शंका
रे संह॰॥ शंकारं वंकारे सं॰॥ वंकारं लंकारे सं॰॥ लंकारं रं
कारे सं॰॥ रंकारं यंकारे सं॰। यंकारं मंकारे सं॰। मंकारं भंकारे सं॰॥

[illegible]ंकारं बंकारे सं०॥ बंकारं फंकारे सं०॥ फंकारं पंकारे सं०॥
पंकारं नंकारे सं०॥ नंकारं धंकारे सं०॥ धंकारं दंकारे सं०॥
दंकारं थंकारे सं०॥ थंकारं तंकारे सं०॥ तंकारं णंकारे सं०॥
णंकारं ढंकारे०॥ ढंकारं डंकारे सं०॥ डंकारं ठंकारे सं०॥ ठंका
रं टंकारे सं०॥ टंकारं ञंकारे सं०॥ ञंकारं झंकारे सं०॥ झंका
रं जंकारे सं०॥ जंकारं छंकारे सं०॥ छंकारं चंकारे सं०॥ चंका
रं ङंकारे सं०॥ ङंकारं घंकारे सं०॥ घंकारं गंकारे सं०॥ गं
कारं खंकारे सं०॥ खंकारं कंकारे सं०॥ कंकारं अःकारे सं
ह०॥ अःकारं अंकारे सं०॥ अंकारं औकारे सं०॥ औकारं ॥५८॥

ओंकारे सं०॥ ओंकारं ऐंकारे सं०॥ ऐंकारं एंकारे सं०॥ एं
कारं ॡंकारे सं०॥ ॡंकारं ऌंकारे सं०॥ ऌंकारं ॠंकारे सं०॥
ॠंकारं ऋंकारे सं० ऋंकारं ऊंकारे सं०॥ ऊंकारं उंकारे सं०॥
उंकारं ईंकारे सं०॥ ईंकारं इंकारे सं०॥ इंकारं आंकारे सं०॥
आंकारं अंकारे सं०॥ अंकारं ॐकारे संहरामि॥ ॐकार
ब्रह्मरंध्रे सहस्राब्जे योऽयामि॥ ॥इति मातृकोपसंहारः॥
अथ भतशुधिः॥ ॥अस्य शरीरस्य ब्रह्मा ऋषिः प्रकृ
तिपुरुषंछंदः॥ सत्या देवता सकलपुरुषार्थसिध्यर्थं
सर्वबीजाधिकारसिध्यर्थं देह शुधिकं हि [illegible]॥ [illegible]
अनुष्ठाना

संध्या०
॥६॥

मुद्रांबध्वानालंसुषोमाभिमं॥ ऐक्यबुध्यैकुमारो पेतंपरं वैराग्य
कारिणीक॥ अधोमुखंतुहृत्पद्मंप्रणवेनोर्ध्वमुखंनयेत्॥ तत्रस्थंचि
तयात्मानंहंसइत्यक्षरत्रबुधः॥ पार्ष्णिघातकरस्फोटदिग्बंधदृ
ष्टिविलोकनं॥ प्रणवेनोर्ध्वमुखीकृत्यप्रणवेनविकसीकृत्य
हंसः॥ सोहमितिमंत्रेणजीवात्मानंपरमात्मनिएकीकृत्य॥
अस्यश्रीपंचमहाभूतमंत्रस्यअत्रिभरद्वाजब्रह्मेंद्रेश्वराऋ
षयः॥ त्रिष्टुबनुष्टुप्बृहतीपंक्तिजगत्यश्छंदांसि॥ समीर
णाग्निवरुणपृथिव्याकाशोदेवताः॥ शोषणदहनप्लाव
नपिंडीकरणसंस्थापनान्यहंकरिष्ये॥ त्वचामकुक्षौप

॥६॥

च महापातकोपपातकमयपुरुषं विचिंतयेत्॥ ब्रह्मह
त्याशिरस्कं॥ स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायुक्तं गुरु
तल्पकटिद्वयं॥ तत्संसर्गपदद्वंद्वमंगप्रत्यंगपातकं॥ उप
पातकरोमाणं रक्तश्मश्रुविलोचनं॥ अचेतनमधोवक्त्रं
दग्धपादपसन्निभं॥ खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिं
तयेत्॥ ॥ पार्थिवमंत्रस्य ब्रह्माऋषिः॥ पृथ्वी देवता
गायत्रीछंदः॥ पार्थिवाख्यभूतशुद्ध्यर्थे जपे विनि॥ पादादि
जानुपर्यंतं पृथिवीस्थानं तत्र पार्थिवमंडलं चतुरस्रमष्ट
दिक्षु वज्रलांछितं तन्मध्ये लंबीजं पीतवर्णं तेन पंचगुणां

नृ०या०
॥ ७५

पृथ्वीं षडुद्घातप्रयोगेणाश्रोषयामि ॥ ॥ ॐ ह्रां ६ ॥ स्यो
नापृथिवीभव० थः ॥ वारुणमंत्रस्य गोतम ऋ० वरुणो
दे० त्रिष्टुप् छ० वारुणाख्यभू० गः ॥ जान्वादिनाभिपर्यंतं आ
पोस्थानं तत्र वारुणमंडलं धनुराकारं उभयोः कोट्योः श्वे
तपद्मलांछितं तन्मध्ये वं बीजं शुक्लवर्णं तेन चतुर्गुणा आ
पः पंचोद्घातप्रयोगेण ॥ ॥ ॐ ह्रीं ५ ॥ त्वन्नो अग्ने० स्वाहा
आग्नेयमंत्रस्य कश्यप ऋषिः ॥ अग्निर्देवता गायत्री छंदः
आग्नेयाख्यभूतशुद्ध्यर्थे जपे वि० गः ॥ नाभ्यादिहृदयपर्यं
तं अग्निस्थानं तत्र त्रिकोणं मंडलं कोणत्रये स्वस्तिकै रंकितं ॥ ७ ॥

वह्नि

तन्मध्ये रंबीजं रक्तवर्णं तेन त्रिगुणं वह्निं चलुं उद्घातप्रयोगे ॥ ॐ हूं ४ ॥
अग्नी रक्षांसि सेधति ईड्यः ॥ वायव्यमंत्रस्य किष्किंधऋषिः ॥ वायुर्देव
ता ॥ अनुष्टुप् छंदः ॥ वायव्याख्य प्रयोगः ॥ हृदयादि भ्रूमध्यपर्यंतं वायु
स्थानं षाँगस्तत्र वर्तुलं वायुमंडलं बिंदुभिः षड्भिरंकितं तन्मध्ये यं बीजं ह
रितवर्णं तेन द्विगुणं वायुं त्रिरुद्घातप्रयोगे ॥ ॐ यैं ३ ॥ आ वातवाहि
भेषजं ॰ यद्रो ॥ आकाशमंत्रस्य ब्रह्मा ऋषिः महदाकाशो देवता गाय
त्री छंदः ॥ आकाशाख्य भूत प्रयोगः ॥ भ्रूमध्यादि रंध्रपर्यंतं आका
शदेशस्तत्र वर्तुलं नभोमंडलं ॥ तन्मध्ये हं बीजं नीलवर्णं तेन करु
णं नभो द्विरुद्घातप्रयोगे ॥ अशोषयामि ॥ ॐ हौं ५ ॥ आकाशशरीरं
ब्रह्म सत्यात्म प्राणारामं मन आनंदं शांतिसमृद्धममृतं इति प्रा
चीनयोग्यापास्व ॥ स्वबामकुक्षौ पूर्वोक्त पापपुरुषं संस्मृत्य तेन सह श
आदित्प्रत्नस्य वत्स आकाशो गायत्री ॥ आकाशाख्य ॰ ॥ आदित्प्रत्नस्य रेतसः ॥

रीरस्य शोषण दहनार्थं द्वादशवारं प्रणवेन वायुमापूर्य हृदयदेशाज्जीव
कलामुत्थाप्य ब्रह्मरंध्रं नीत्वा तदुपरि द्वादशांते संस्थाप्य पापपुरुषे
ण सह स्वशरीरं शोष्य दहेत्॥ एवं संचिंत्य यमिति वायुबीजं। पूरककुंभ
करेचकेषु स्मृत्वा कुंभककाले वायुबीजोत्थितेन वायुना पापपुरुषं शो
षयित्वा रमिति वह्निबीजेन पूर्ववद्दग्ध्वा वमिति तोयबीजेन तद्भस्म पू
र्ववत्प्लाव्य बहिर्निःसार्य लमिति पृथ्वीबीजेन पिंडीकृत्य हमिति आका
शबीजेन देहनिष्पत्तिः॥ शुद्धबुद्धनित्यमुक्तसच्चिदानंदात्मकं ब्रह्मै
वाहमिति भावयित्वा पुनः सृष्टिक्रमेण सृष्टिमारभेत्॥ कारणीभूता
दात्मनः प्रकृतिः॥ प्रकृतेर्महान्। महतोऽहंकारः। अहंकारात्पंचत
न्मात्राणि ततः आकाशः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः।
अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नं। अन्नाद्रेतः।
रेतसः पुरुषः। इति क्रमेण स्वशरीरं तेजोमयं पुण्यात्मकं सकलपुरुषार्थ ॥८॥

॥ इति भूतशुद्धिः॥ अथ प्राणप्रतिष्ठा॥ ३

साधनयोग्यं समुत्पन्नमिति भावयित्वा पूर्वं ब्रह्मणि
ति संयोजितां जीवकलां सोहमिति मंत्रेण स्वस्य प्रतिमा
याश्च प्राणप्रतिष्ठां कुर्यात्॥ ॐ अस्य श्री प्राणप्रतिष्ठा
मंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः॥ ऋग्यजुःसामाथर्वाणि
छंदांसि॥ प्राणशक्तिः परादेवता॥ आं बीजं॥ ह्रीं शक्तिः॥
क्रों कीलकं॥ प्राणप्रतिष्ठासिध्यर्थे जपे विः॥ ब्रह्मविष्णु
रुद्रेभ्यो नमः शिरसि॥ ऋग्यजुःसामछंदेभ्यो नमः मुखे॥
चिद्रूपिण्ये प्राणशक्त्यै देवतायै नमः हृदि॥ आं बीजा
य नमः गुह्ये॥ ह्रीं शक्तये नमः पादयोः॥ क्रों कीलकाय

त०स्त्रा० ५
॥ ९ ॥

नमः सर्वांगे॥ अथांगुलिन्यासः॥ ॥ॐ आं ह्रीं क्रों अं
कं खं गं घं ङं आं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अं
गुष्ठाभ्यां नमः॥ ॐ आं ह्रीं क्रों इं चं छं जं झं ञं ईं शब्दस्प
र्शरूपरसगंधात्मने ईं तर्जनीभ्यां॥ ॐ आं ह्रीं क्रों उं टं ठं
डं ढं णं ऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमा०॥
ॐ आं ह्रीं क्रों एं तं थं दं धं नं ऐं वाक्पाणिपादपायूपस्था
त्मने ऐं अनामिकाभ्यां॥ ॐ आं ह्रीं क्रों ओं पं फं बं भं मं
औं वचनादानगमनविसर्गानंदात्मने औं कनिष्ठिका०॥
ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ळं क्षं अः मनोबुध्यहं ॥ ९ ॥

हः सोऽहं
यं रं लं वं श्रां षं सं हं लं क्षं मम देवस्य

कार चित्त विज्ञानानंदात्मने अः करतलकरपृष्ठाभ्यां नमः ॥
एवं हृदयादि ॥ ॐ आं ह्रीं क्रों यं० १० मम प्राणा इह प्राणाः ॐ देव
आं ह्रीं क्रों यं १० मम जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों यं १० मम देवस्य
सर्वेंद्रियाणि ॐ आं ह्रीं क्रों यं १० मम वाङ्मनश्चक्षुः श्रोत्र
स्वरूपे जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ॥ अथ
ध्यानं ॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा
कराग्रैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंच
बाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षो
रुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ल० बा०
॥१०॥

॥ इतिप्राणप्रतिष्ठा ॥ ॥ हृदयेहस्तंदत्वागर्भाधानादिपं
चदशसंस्कारान्भावयेत् ॥ प्रणवंपंचदशवारंजपेत् ॥
अथकेवलमातृकान्यासः ॥ ॐ अं कं ५ आं अंगुष्ठाभ्यां० ॥
ॐ इं चं ५ ईं तर्जनीभ्यां० ॥ ॐ उं टं ५ ऊं मध्यमा० ॥ ॐ एं तं ५ ऐं
अना० ॥ ॐ ओं पं ५ औं कनिष्ठिकाभ्यां० ॥ ॐ अं यं १० अः
करतलकरपृष्ठाभ्यां० ॥ एवंहृदयादि ॥ अथध्यानं ॥ पं
चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां
भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां ॥ अक्ष
स्रक्कुंभचिंतालिखितवरकरांत्र्यक्षणांपद्मसंस्था ॥ १०॥
च्छा

मह्लाकल्पामतुङ्गस्तनजघनभरां भारतीतां नमामि ॥१॥ इ
तिकेवलमातृकान्यासः ॥ अथ ॥ अंतर्मातृकामंत्रस्यब्रह्मा
ऋषिः गायत्रीछंदः संहाररूपशारदादेवीदेवता ॥ हलोबीजा
नि ॥ स्वरः संग्रहः शक्तिः ॥ बिंदवः कीलकं ॥ अंतर्मातृकान्या
सेवि० ॥ ॐकारे सर्वेत्र ॥ ॐब्रह्मणेनमः शिरसि ॥ ॐगाय
त्रीछंदसेनमः मुखे ॥ ॐसंहाररूपशारदादेवीदेवतायेनमः
हृदये ॥ ॐहलोबीजात्मकेभ्योनमः गुह्ये ॥ ॐस्वरः संग्र
हः शक्त्येनमः पादयोः ॥ ॐबिंदवः कीलकायेनमः
सर्वांगे ॥ अथ ॥ कंठेषोडशस्वराः ॥ ॐअंनमः ॐआं

त्वचा॰ नमः। ॐ इं नमः। ॐ ईं नमः। ॐ उं नमः। ॐ ऊं नमः। ॐ ऋं नमः।
॥११॥ ॐ ॠं नमः। ॐ ऌं नमः। ॐ ॡं नमः। ॐ एं नमः। ॐ ऐं नमः।
ॐ ओं नमः। ॐ औं नमः। ॐ अं नमः। ॐ अः नमः॥१६॥ अ
वर्णाः थ हृदये द्वादशाँ॥ ॐ कं नमः। ॐ खं नमः। ॐ गं नमः। ॐ घं
नमः। ॐ ङं नमः। ॐ चं नमः। ॐ छं नमः। ॐ जं नमः। ॐ
झं नमः। ॐ ञं नमः। ॐ टं नमः। ॐ ठं नमः॥१२॥ अथ ना
भौ दश॥ ॐ डं नमः। ॐ ढं नमः। ॐ णं नमः। ॐ तं नमः।
ॐ थं नमः। ॐ दं नमः। ॐ धं नमः। ॐ नं नमः। ॐ पं नमः।
ॐ फं नमः॥१०॥ अथ गुह्ये षट्॥ ॐ बं नमः। ॐ भं नमः। ॥११॥

ॐ मं नमः। ॐ यं नमः। ॐ रं नमः। ॐ लं नमः।। ६।। अथ अपाने
चत्वारि। ॐ वं नमः। ॐ शं नमः। ॐ षं नमः। ॐ सं नमः।। ७।।
अथ भ्रूमध्ये द्विः।। ॐ हं नमः। ॐ क्षं नमः।। ।। आधारे लिंगना
भौ प्रकटितहृदये तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशाद त्रके
शादले द्वादशार्धे चतुष्के। वासांते बालमध्ये डफकठसहिते आ
दिहक्षांतयुक्ते मध्ये हंसे सुदीप्त सकलकलयुतं वर्णरूपं
नमामि।। ।। अथ ध्यानं।। ।। बंधूकाभां त्रिनेत्रां पृथुजघ
नलसत्कुक्षिंमद्रक्तवस्त्रां पीनोत्तुंगप्रवृद्धस्तनभर
जघनां यौवनारंभरूढां।। सर्वालंकारयुक्तां सरसिजन
यनाभिंदुसंक्रांतिमोह्लिमबां पाशांकुशपाणीमभयवर

कृराम विक्रांतं नमामि॥ ॥इति अंतर्मातृकान्यासः॥ ॥
अथ बहिर्मातृकान्यासः॥ ॥अस्य श्री बहिर्मातृकामंत्रस्य॥
ब्रह्मा ऋषिः शिरसि॥ गायत्री छंदः मुखे॥ मातृका सरस्व
ती देवता हृदये॥ हलो बीजानि गुह्ये॥ स्वराः शक्तयः नमः पा
दयोः॥ बिंदुः कीलकाय॰ सर्वांगे॥ बहिर्मातृकान्यासे वि०॥ ॐ
कार सर्वत्र॥ ॐ अं नमः शिरसि॥ ॐ आं नमः वदने॥ ॐ इं नमः दक्षिण
नेत्रे॥ ॐ ईं नमः वामने०॥ ॐ उं नमः॥ दक्षिणकर्णे॥ ॐ ऊं नमः वामकर्णे॥
ॐ ऋं नमः दक्षिणनासापुटे॥ ॐ ॠं नमः वामनासा॥ ॐ ऌं दक्षिण
कपोले॥ ॐ ॡं वामकपो॥ ॐ एं ऊर्ध्वोष्ठे॥ ॐ ऐं अधरोष्ठे॥ ॐ ओं नमः
ऊर्ध्वदंतपंक्तौ॥ ॐ औं अधोदंत॰ ॐ अं मूर्ध्नि॥ ॐ अः मुखे॥ ॐ कं॰ खं॰ गं॰
ॐ घं॰ ङं नमः॥

राम

इतिदक्षिणहस्तसंधिषु। ॐ चं॰ छं॰ जं॰ झं॰ ञं नमः। इतिवा
महस्तसंधिषु॥ ॐ टं॰ ठं॰ डं॰ ढं॰ णं नमः। दक्षिणपादसंधिषु॥
ॐ तं॰ थं॰ दं॰ धं॰ नं नमः। वामपादसंधिषु॥ ॐ पं॰ फं नमः
दक्षिणपार्श्वयोः। ॐ बं नमः पृष्ठे। ॐ भं॰ नाभौ। ॐ मं॰ उद
रे॥ ॐ यं॰ हृदये। ॐ रं नमः दक्षिणस्कंधे। ॐ लं नमः ककु
दि। ॐ वं॰ वामस्कंधे। ॐ शं॰ हृदयादिदक्षिणकरे। ॐ षं न
मः हृदयादिवामकरे॥ ॐ सं नमः हृदयादिदक्षिणपादे॥
ॐ हं नमः हृदयादिवामपादे॥ ॐ ळं नमः नाभ्यादिहृदय
पर्यंतं॥ ॐ क्षं नमः हृदयादिमुखपर्यंतं॥ ॥अथ ध्यानं॥ ॥

त०चा० अभ्रस्वजं हरिणपोतमुदग्रटंकविद्यांकरैरविरतं दधतीं
॥१२५ त्रिनेत्रां ॥ अर्धेन्दुमौलिमरुणामरविंदसंस्थां वर्णेश्वरीं प्र
म णमत स्तनभारनम्रां ॥ ॥ इति बहिर्मातृका न्यासः ॥ ॥
अस्य शरीरस्येत्यादि सर्वं समाप्य संकल्पं कुर्यात् ॥ एवं
गुणेति ॐ हरिहरब्रह्मात्मकस्य मित्रादि द्वादशरूपिणो
अरुणादि द्वादशमासाधिपतिस्वरूपस्य द्वादशावरण
सहितस्य त्रयीमूर्तेर्भगवतः श्रीसूर्य प्रीति द्वारा अस्य प
शरीरस्य जमानस्य अमुक गोत्रोत्पन्नस्य अमुक नक्षत्रे जातस्य
अमुक राशिस्थितस्य शरीरे वर्त्तमान पापनिदानपद्रूपस ॥१२॥

मस्तामयनि हानभूत दुरितापूर्वनिवृत्तिद्वारा समस्तामय
निबर्हणार्थं उस्मन्नोत्पतस्यमानमहारोगनिखिलांगवेदना महा
निरासार्थं क्षिप्रारोग्यदीर्घायुःप्राप्तये उद्यन्नद्येतितृचमंत्र
स्य कण्वपुत्रः प्रस्कण्व ऋषिः ॥ मित्ररविसूर्यभानुखगपूष
या हिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करात्मा रोगहर्त्ता
श्रीसूर्यो देवता ॥ अनुष्टुप् छंदः ॥ उदात्तस्वरः ॥ ज्ञानं क्षेत्रं ।
रूपं तत्वं । ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति बीजानि ॥ पादार्धर्चेन ऋ
चेन तृचेन त्रिरावृत्तेन कल्पोक्तन्यासपूर्वकं अमुकावर्त्त
न संख्यया तिलतंडुलयवरक्तकुसुमदूर्वादलजलयुतेन ता

मंत्र

त्रचा० ॥१४॥

त्रपात्रेणश्रीसूर्यायार्घ्यदानंकुर्य्ये॥ अर्घ्योदकंन्यसेद्वा
मेगंधपुष्पाणिदक्षिणे॥ अग्रेधूपपार्श्वतोदीपःपलाद्यन्य
घथानुवाचि:॥ ततोमूलेनकरशुद्धिंकृत्वाव्यापकंचकृत्वादे
हांगन्यासमारभेत्॥ उद्यन्नद्येतिमंत्रस्यकण्वःपुत्रःप्रस्कण्व
ऋषिः॥ शिरसेनमः॥ अनुष्टुप्छंदः॥ मुखाय०॥ सर्वरोगापह
र्त्ताजगदात्माश्रीसूर्योदेवता॥ हृदयाय०॥ ह्रानं हों ह्रें रूपं
तत्वं॥ श्रीबीजंनाभ्यैनमः॥ ह्रीं कीलकं॥ आधारायन०॥ द्वा
दशांगन्यासंवि०॥ ॐ उद्यंनद्यमित्रमहः॥ दक्षिणहस्ता
यनमः॥ कुकृतान्मिमोरक्षतुमां॥ ॐ आरोहन्नुत्तरांदिवं॥ ॥१४॥

वामहस्ताय॰ विहिताकरणाद्भवीरक्षतुमां॥ ॐ हृद्रोगं मम
सूर्य [illegible] ना [illegible] ॥ हृदयाय॰ सूर्योदितानाद्रक्षत्वनाम
यंकरोतुमां॥ हरिमाणंचनाशय। शिरसे स्वाहा। जानुः सर्व
भूतेभ्यो रक्षतुमां॥ ॐ शुकेषुमे हरिमाणं। दक्षिणचरणा
य॰ प्रतिषिद्धगमनाद्वगो रक्षतुमां॥ ॐ रोपणाकासुदध्म
सि। वामचरणाय॰ विहितागमनाद्रूपधारक्षतुमां॥ ॐ अथो
हारिद्रवेषुमे। नाभ्यै॰ तमोजाड्याद्धिरण्यगर्भो रक्षतुमां॥
ॐ हरिमाणंनिद [illegible] ध्मसि। मुखाय॰ प्रतिषिद्धजिह्वाव्यापा
रात्सर्वतोमरीरैक्षतुमां॥ ॐ उदगादयमादित्यः दक्षिणेक्ष

ची ने ग्री

णाय॰ प्रतिषिद्धेक्षणादादित्यो रक्षतु मां ॥ ॐ विम्बेन सहस्र
सह। वामेक्षणाय॰ विहिता। वीक्षणा सविता रक्षतु मां ॥
ॐ द्विषंतं मह्यं रंधयन्तु। केवचाय हुं। त्वं लोमान्यकों रक्षतु
मां ॥ ॐ मो अहं द्विषते रधं। अस्त्राय फट्। दिग्देवताभ्यो भा
स्करो रक्षतु मां ॥ ॐ ह्रां उद्यन्नद्य॰ दिव ॥ मित्र रविभ्यां नमः
अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं हृद्रोगं मम॰ राय ॥ सूर्य भानुभ्यां॰
तर्जनीभ्यां॰ ॥ ॐ शुकेषु मे॰ ति ॥ खग पूषाभ्यां॰ मध्यमाभ्यां॰
ॐ ह्रैं अथो हारि॰ ध्मसि ॥ हिरण्यगर्भ मरीचिभ्यां॰ अनामि
काभ्यां॰ ॥ ॐ ह्रौं उदगादयं॰ ह ॥ आदित्य सवितृभ्यां॰ कनिष्ठि

ह्रू

सू० या०
॥१६॥

देसूक्ष्मगणपतये० । वामपादे स्थूलगणपतये० । मूर्ध्नि अर्का
य० । ललाटे रवये० । नेत्रयोः सूर्याय० । कर्णयोर्दिवाकराय० ।
नासिकायां भानवे० । मुखे भास्कराय० । ओष्ठयोः पर्जन्याय० । जि
ह्वायां विष्णवे० । कंठे सुवर्णरेतसे० । स्कंधयोस्तिग्मरेतसे० । बा
ह्वोः पूष्णे० । पृष्ठे मित्राय० । दक्षिणहस्ते वरुणाय० । वामहस्ते
त्वष्ट्रे० । करयोः उष्णकराय० । हृदये भानुमते० । उदरे यमा
य० । नाभौ आदित्याय० । कट्यां हंसाय० । ऊर्वोः रुद्राय० । जान्वोः
गोपतये० । जंघयोः सवित्रे० । गुल्फयोः वैवस्वताय० । पादयोः
प्रभाकराय० । बाह्यतः तमोध्वंसिने० । अभ्यंतरे खगाय० । स ॥१६॥

र्वांगे सहस्रांशवे० ॥ दशदिक्षु खगाय नमः ॥ ॐ उद्यन्नद्य०
दिवं ॥ ह्रां शिरसे न० । ॐ हृद्रोगं मम० य ॥ ह्रीं मुखाय० । ॐ शुके
षु मे० सि । ह्रूं हृदयाय० । ॐ अथो हारिद्र० ध्मसि ॥ ह्रैं नाभ्यै० ।
ॐ उदगादयं० सह । ह्रौं जानुभ्यां० । ॐ द्विषंतं मह्यं० रधं ॥ ह्रः
पादाभ्यां० ॥ ॥ इति देहांगन्यासः ॥ ॥ अथ कलशप्रतिष्ठा ॥ ॥
महीद्यौः० । ॐ षधयः० । आकलशेषु० । इमं मे गंगे० । याः फलिनीः० ।
स्योना पृथिवी भव० । सहिरत्नानि० । हिरण्यरूपः० । कलशस्य
मुखे विष्णुः० । सर्वे समुद्राः० । गंगे च यमुने चैव० । तत्वायामि० । श्री
खंडोदरतीर्थानि कैरस्पृष्टानि ते रवे ॥ तेन सत्येन मे देव देहि ती

त॰ न्या॰ ॥१७॥

धौ दिवाकर॥ सूर्यमंडलात् अंकुशमुद्रया कलशे तीर्थान्यावाह्य
गरुडमुद्रया निर्विषीकृत्य अमिति धेनुमुद्रया अमृतीकृत्य
अस्त्रायनमः इति संरक्ष्य॥ प्रक्षालिते अर्घ्यपात्रे हृदयायन
मः॥ शिरसे नमः॥ तस्मिन् गंधपुष्पयुतं जलं प्रक्षिप्य तत्र
मंत्रेणाभिमंत्र्य मुद्राः प्रदर्शयेत्॥ धेनु॰ शंख॰ पद्म॰ गरु॰
गरुड॰ अंकुश॰ यमपाश॰ ग्रथित॰॥ इत्येता मुद्राः प्रद
र्श्य॥ तदर्घ्यपात्रस्थ जलं किंचित् कलशे निक्षिप्य शेषेण पूजा
द्रव्याणि यागभूमिं चात्मानं च संप्रोक्ष्य मूलमंत्रेण तापकर्षस्त्रा
नं कुर्यात्॥ ताम्रपात्रस्योपरि अष्टदलं कृत्वा पूर्वादिक्रमेण ॥१७॥

ॐ ह्रां अंगु॰ ॐ ह्रीं त॰ ॐ ह्रूं म॰ ॐ ह्रैं अ॰ ॐ ह्रौं ॐ ह्रः क॰॥
एवं हृदयादि॥

काभ्यां॰॥ ॐ ह्रः द्विषतं मह्यं॰ रधं॥ अर्कभास्कराभ्यां॰ करतल
करपृष्ठाभ्यां॰॥ ॥एवं हृदयादि॥ ॐ मित्ररविभ्यां नमः॥ अंगुष्ठा
भ्यां॰ ॐ सूर्यभानुभ्यां॰ तर्जनी॰॥ ॐ खगपूषभ्यां नमः॥ म
ध्यमाभ्यां॰॥ ॐ हिरण्यगर्भमरीचिभ्यां॰ अनामिकाभ्यां॰॥ ॐ
आदित्यसवितृभ्यां॰ कनिष्ठिकाभ्यां॰॥ ॐ अर्कभास्कराभ्यां॰ क
रतलकरपृष्ठाभ्यां॰॥ एवं हृदयादि॥ शिखायां भास्कराय॰ ल
लाटे सूर्याय॰ भ्रूमध्ये भानवे॰ चक्षुषोः उग्रचक्षुषे॰ कंठे भानु
मते॰ स्तनयोस्तिमिरनाशिने॰ नाभौ जातवेदसे॰ गुह्ये उग्रर
पाय॰ जंघयोस्तेजोरूपाय॰ गुल्फयोः रक्षोविनाशाय॰ दक्षिणपा

देवतान्यसेत्॥ ॐ दंदंडिनेनमः॥ ॐ उंउग्रसेन॰। पिंपि
गलायन॰ प्रंप्रचंडाय॰ क्षेंक्षेत्रपालाय॰। गंगणपतये॰। दुं धि
दुर्गायै॰। लंलक्ष्म्यै॰। इत्यादिबीजदेवताभ्यः गंधादिभिर
राभ्यर्च्य॥ पूर्वादिक्रमेण॥ सुंसूर्याय॰ दिवाकराय॰ वैवस्व
ताय॰ भगाय॰ वरुणाय॰ मित्राय॰ आदित्याय॰ विष्ण
वे॰ मध्ये भास्कराय॰ इत्यादिदेवताभ्यः गंधादिभिरभ्य
र्च्य॥ दीप्तायै॰ सूक्ष्मायै॰ जयायै॰ भद्रायै॰ विभूत्यै॰ विम
लायै॰ अमोघायै॰ विद्युतायै॰ मध्ये श्रीसर्वतोमुख्यै॰॥ इ
त्यादिशक्तिदेवताभ्यः गंधादि॰॥ आदित्याय॰ सावित्रेण॰

त॰चा॰ सूर्याय॰ खगाय॰ पूष्णे॰ गभस्तिने॰ मार्त्तंडाय॰ जगच्चक्षु

॥१८॥ षे॰ दलादिग्रहदेवताभ्यः गंधादिभिः॰॥ अथ पीठपू

जनं॥ ॥आधारशक्त्यै॰ मूलप्रकृत्यै॰ कूर्माय॰ वरा

वै॰ हाय॰ अनंताय॰ पृथिव्यै॰ सुवर्णमंडपाय॰ रत्नसिंहा

सनाय॰ सरस्वत्यै॰ सुवर्णवेदिकायै॰ मध्ये धर्माय॰

ज्ञानाय॰ वैराग्याय॰ ऐश्वर्याय॰॥ कोणेषु॥ अधर्माय॰

अज्ञानाय॰ अवैराग्याय॰ अनैश्वर्याय॰ ऋग्वेदाय॰

यजुर्वेदाय॰ सामवेदाय॰ अथर्ववेदाय॰ कृतयुगाय॰

त्रेतायुगाय॰ द्वापरयुगाय॰ कलियुगाय॰ मत्सराय॰ ॥१८॥

पारिजाताय॰ संतानाय॰ कल्पवृक्षाय॰ हरिचंदनाय॰ मध्ये
मूलाय॰ कंदाय॰ नालाय॰ पद्माय॰ पद्मपत्रेभ्यो॰ केसरेभ्यो॰
कर्णिकायै॰ कर्णिकोपरि सूर्यमंडलाय॰ सूर्यमंडलाधि
पतये ब्रह्मणे॰ सोममंडलाय॰ सोममंडलाधिपतये वि
ष्णवे॰ वह्निमंडलाय॰ वह्निमंडलाधिपतये रुद्राय॰ श
क्तिमंडलाय॰ शक्तिमंडलाधिपतये वृषभध्वजाय॰
२ शान्ति विद्यातत्वाय॰ रैँ क्रूँ तत्वाय॰ आत्मतत्वाय॰ शिवतत्वा
य॰ सत्वाय॰ रजसे॰ तमसे॰ आत्मने॰ अंतरात्मने॰
परमात्मने॰ भूः पुरुषाय॰ भुवः पुरुषाय॰ स्वः पुरुषाय॰।

त्यार्घ्य॰
॥१९॥

ॐ भूर्भुवः स्वः पुरूषाय॰। पीठदेवताभ्यः गंधादिरभ्यर्च्य॰॥
विनतातनयो देवः कर्त्ता साक्षी सुरेश्वरः॥ सप्ताश्वः सप्त
रज्जुश्च अरुणो मे प्रसीदतु॥ अरुणासनाय॰ योगास
नाय॰। प्रसृतासनाय॰ विमृतासनाय॰ आधारासनाय॰
मध्ये पद्मसुखासनाय॰ अरुणमावाहयामि॥ सारथि
मावाहयामि॥ सप्ततुरंगानावा॰॥ अरुणदेवताभ्यः गंधा॰॥
॥ ॥अथ ध्यानं॥ ॥तेजोराशिंभियामुर्त्तं तप्तकांचनसंनि
भं॥ किरीटिनं पद्मनेत्रं पद्मरागविभूषितं॥१॥ पद्मासनः
पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्व रथसंयुक्तो द्विभुजः ॥१९॥

ब्रह्म

स्पा सदा रविः ॥ २ ॥ ध्येयः सदा सवितृमंडलमध्य
वर्त्ती नारायणः सरसिजासनसंनिविष्टः ॥ केयूरवान्म
करकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥
॥ ३ ॥ सशंखचक्रं रविमंडलेस्थितं कुशेशयाक्रांतमनंतम
च्युतं ॥ भजामि बुध्या तपनीयमूर्त्तिं सुरोत्तमं चित्रवि
भूषणोज्वलं ॥ ४ ॥ निमीलितार्क्षः सनंतयोगसमा
रंभेतं ॥ धर्मकंद समुद्भूतं ज्ञाननालं सुशोभितं ॥ ऐश्वर्या
ष्टदलोपेतं परं वैराग्यकर्णिकं ॥ १ ॥ इति हृत्कमले वि
विंसे ॥ ॥ ततो हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं ॥

व

त्वार्घ्यं० ॥२०॥

यो ऽसावादित्यः पुरुषः सोसावहं ॥ अहमादित्योहं ॥ श्रीसूर्यो
हं ॥ सूर्य आत्मा जगतस्तस्थुषश्च ॥ योसौ परात्परो देवः श्रीसू
र्यो जगदीश्वरः ॥ पद्मदेहं मिहायातु पूजार्थं सूर्यमंडलात् ॥
ज्योतिर्मयमादित्यं सूर्यमंडलोहं ॥ सौवर्णेन सोपानमा
र्गेणावतीर्य स्वहृत्कमलेनानामयं उपचारैः पूजयेद् ॥
तद्यथा ॥ भगवते श्रीसूर्याय आसनं पाद्यं अर्घ्यमाचमनं
स्नानं पुनराचमनीयं वस्त्रोपवीतं अलंकरणं गंधाक्षता
करवीरार्कपुष्पाणि धूपदीपनैवेद्यं आचमनीयं सर्वं प
रिकल्प्य ॥ पाणिप्रक्षाल्य ॐमिस्फ क्रोहृदयकमलादंत

मनोमयं ॥२०॥

नीडीमार्गेणसूमध्यमानीयनासाग्रतोरेचकेनपुष्पांज
लौसंस्थाप्यविम्बेतच्चक्रुरितिमंत्रेणपुष्पेभ्यः पीठमाग
तंभावयन्पुष्पाणिक्षिपेत् ॥ एहिसूर्यसहस्रांशोतेजो
राशेजगत्पते ॥ अनुकंपयमांभक्त्याप्रसीदपरमेश्वर ॥
१ कृष्णेनरऊसा० ॥ कलिंगदेशस्थंकाश्यपगोत्रंविश्वा
त्रऋषिंविशाखानक्षत्रंछंदसंकपिलाग्निवर्णंदोमयंह
...सप्ताश्वंद्विभुजंप्रदक्षिणीकुर्वाणंअधिदेवताग्निसहि
तंप्रत्यधिदेवतारुद्रसहितंरक्तहत्वमंडलेप्राङ्मुखउपवि
श्य ॥ भूः पुरुषमादित्यमावाह[illegible]यामि ॥ भुवः पुरु

सूर्यार्घ्य॰ षमादित्यमा॰ स्वः पुरुषमादित्यमा॰ ॐ भूर्भुवः स्वः पुरुषमादित्य
॥२१॥ मावा॰ श्रीसूर्यस्त्वाहुतो भव ॥ सुप्रतिष्ठि भव ॥ संन्निहितो भ तो
व ॥ असिमुखो भव ॥ सुप्रसन्नो भव ॥ ॥ इस्तुका ॥ आवाहनं ॥
संस्थापनं ॥ सन्निधापनं ॥ सन्निरोधनं ॥ अवगुंठनं ॥ परमी
करणं ॥ अमृतीकरणं ॥ म हामुद्रांप्रदर्श्य ॥ ॥ अथ देवताष
डंगन्यासः ॥ ह्रां हृदयाय॰ ॥ ह्रीं शिरसे॰ ॥ ह्रूं शिखायै॰ ॥ ह्रैं कव
चाय हुं ॥ ह्रौं नेत्रत्रयाय वौ॰ ॥ ह्रः अस्त्राय फट् ॥ इति न्यासः
अथ आवरणानि ॥ ॥ पूर्वादि क्रमेण ॥ ॥ मार्तंडाय नमः
भानवे॰ आदित्याय॰ हंसाय॰ सूर्याय॰ दिवाकराय॰ तपनाय॰ ॥२१॥

भास्कराय०॥८॥ इतिप्रथमावरणं॥ उद्यन्नद्यमित्रमहः
मित्राय० आरोहन्नुत्तरां दिवं। रवये०। हृद्रोगं मम सूर्य। सूर्या
य०। हरिमाणं च नाशय। भानवे०। शुकेषु मे हरिमाणं। खगाय०।
रोपणाकासु दध्मसि। पूष्णे०। अथो हारिद्रवेषु मे। हिरण्यग
र्भाय०। हरिमाणं नि दध्मसि। मरीचये०। उदगादयमादित्यः
आदित्याय०। विश्वेन सहसा सह। सवित्रे०। द्विषंतं मह्यं रंध
यन्। अर्काय। मो अहं द्विषते रधं॥ भास्कराय०॥१२॥
॥इति द्वितीयावरणं॥ ॥सोमाय० अंगारकाय० बुधाय०
बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतवे०॥ ॥इतित

आदित्याय०

तृ.चा.र्घ्य॰ तीयावर्णं॥ ॥धराय॰ध्रुवाय॰सोमाय॰अह्नो॰अनिलाय॰
॥२२॥ अनलाय॰प्रत्यूषाय॰प्रभासाय॰॥८॥ इतिचतुर्थावर्णं॥
वीरभद्राय॰शंभवे॰गिरीशाय॰अजैकपदे॰अहिर्बुध्न्या
य॰पिनाकिने॰भुवनाधीश्वराय॰दिशांपतये॰पशुपतये॰
वा स्थाणवे॰भर्गाय॰॥११॥ इतिपंचमावर्णं॥ ॥धात्रे॰अ
र्यम्णे॰मित्राय॰अंशुमते॰अरुणाय॰भगाय॰इंद्राय॰वि
वस्वते॰पूष्णे॰पर्जन्याय॰त्वष्ट्रे॰विष्णवे॰॥१२॥ इतिषष्ठावर
र्णं॥ अरुणाय॰सूर्याय॰वेदांगाय॰भानवे॰इंद्राय॰रवये॰
गभस्तिने॰यमाय॰सुवर्णरेतसे॰दिवाकराय॰मित्राय॰वि ॥२२॥

ध्याये०॥१२॥ इति सप्तमावरणं॥ असितांगभैरवाय० रुरु
भैरवाय० चंडभै० क्रोधभै० उन्मत्तभै० कपालीभै० भीष
णभैर० संहारभै०॥८॥ इत्यष्टमावरणं॥ ब्राह्म्यै० माहेश्व
र्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० माहेंद्र्यै० चामुंडायै०॥७॥ इ
तिनवमावरणं॥ ॥इंद्राय० अग्नये० यमाय० निर्ऋतये० व
रुणाय० वायवे० कुबेराय० ईशानाय०॥८॥ ॥इतिदशमावरणं॥
मेषाय० वृषभाय० मिथुनाय० कर्काय० सिंहाय० कन्यायै०
तुलायै० वृश्चिकाय० धनुषे० मकराय० कुंभाय० मीनाय०॥
॥१२॥ इत्येकादशावरणं॥ वज्राय० शक्तये० दंडाय० खड्गाय०
डाय०

ट-चार्घ॰ पाशाय॰ ध्वजाय॰ गदाय॰ त्रिशूलाय॰ पद्माय॰ चक्राय॰ ॥१॥
॥२३॥ ॥ इति द्वादशावरणं ॥ ॥ मध्ये श्री सर्वतोमुखे॰ मध्ये मासा
धिपतये॰ मंडलाग्रे अरुणसारथये॰ सप्ताश्वेभ्यो॰
माठराय॰ पिंगलाय॰ दंडाय॰ मंडलो परतः गणपत
ये॰ दुर्गाये॰ क्षेत्राधिपतये॰ वास्तोष्पतये॰ मित्राय॰ रव
ये॰ सूर्याय॰ भानवे॰ खगाय॰ पूष्णे॰ हिरण्यगर्भाय॰
रीचये॰ आदित्याय॰ सवित्रे॰ अर्काय॰ भास्कराय॰
॥ इति द्वादशावरणानि पूजयेत् ॥ ॥ द्वादशावरणो
घ॰ मासाधिपस्य रविर्यो ॥ सायुधं सारथिं चात्र सूर्यमा ॥२३॥

द॰चा॰र्घ॰ पाशाय॰ध्वजाय॰गदाय॰त्रिशूलाय॰पद्माय॰चक्राय॰॥९॥
॥२३॥ ॥ ॥इति द्वादशावरणं॥ ॥मध्ये श्रीसर्वतोमुखे॰मध्ये मासा
धिपतये॰मंडलाग्रे अरुणसारथये॰सप्ताश्वेभ्यो॰
माठराय॰पिंगलाय॰दंडाय॰मंडलोत्तरतः गणपत
ये॰दुर्गायै॰क्षेत्राधिपतये॰वास्तोष्पतये॰मित्राय॰रव
ये॰सूर्याय॰भानवे॰खगाय॰पूष्णे॰हिरण्यगर्भाय॰
मरीचये॰आदित्याय॰सवित्रे॰अर्काय॰भास्कराय॰
॥इति द्वादशावरणानि पूजयेत्॥ ॥द्वादशावरणो
प॰मासाधिपस्वरूपिणे॥सायुधंसारथिंचात्र सूर्यमा ॥२३॥

णवे॰॥१२॥ इति सप्तमावर्णं॥ असितांगभैरवाय॰ रुरु
भैरवाय॰ चंडभै॰ क्रोधभै॰ उन्मत्तभै॰ कपालीभै॰ भीष
णभैरव॰ संहारभै॰॥८॥ इत्यष्टमावर्णं॥ ब्राह्म्यै॰ माहेश्व
र्यै॰ कौमार्यै॰ वैष्णव्यै॰ वाराह्यै॰ माहेंद्र्यै॰ चामुंडायै॰॥७॥
इति नवमावर्णं॥ ॥इंद्राय॰ अग्नये॰ यमाय॰ निर्ऋतये॰ व
रुणाय॰ वायवे॰ कुबेराय॰ ईशानाय॰॥८॥ ॥इति दशमावर्णं॥
मेषाय॰ वृषभाय॰ मिथुनाय॰ कर्काय॰ सिंहाय॰ कन्यायै॰
तुलायै॰ वृश्चिकाय॰ धनुषे॰ मकराय॰ कुंभाय॰ मीनाय॰॥
॥१२॥ इत्येकादशावर्णं॥ वज्राय॰ शक्त्यै॰ दंडाय॰ खड्गाय॰
[illegible]डाय॰

गा

सा

वाहयाम्यहं ॥१॥ ऊर्ध्वदिग्भागे हल्लेखायै० अधोदिग्भा
गे गंभीरनायै०। दक्षिणदिग्भागे रक्तायै० पश्चिमदिग्भागे
महोत्कटायै० उत्तरदिग्भागे करालिन्यै० पूर्वदिग्भागे
दिवाकराय०॥ ॥इतिदिग्बंधः॥ अथपूजनं ॥ उद्यन्०
ह्र०॥ मित्राय० आवाहयामि॥ आरो० वं। रवये० आसनं०।
हृद्रो०ग्रं। सूर्याय० पाद्यं०। हरिमा०णं। भानवे० अर्घ्यं। शुके०
षु०। खगाय० आचमनीयं०। रोपणा० सि। पूष्णे० स्नानं०।
पंचामृतादिपंचमंत्रैः॥ आप्यायस्व० ष्णे। दधिक्राव्णः० हं
घृतंमिमिक्षे० धां। मधुवाता० तुनः। स्वादुःपवस्व० ष्पः॥ इति

त्र्याध्धी.
॥२७॥

पचमंत्रैः पंचामृतस्नानं ॥ ॥ उद्धंनयेतिसर्वैर्मंत्रैः ॥ शुद्धोद
कस्नानं ॥ अथोहारि० मे । हिरण्यगर्भाय० वस्त्रं ॥ हरिमा
पं० सि । मरीचये० यज्ञोपवीतं । उदगा० सः । आदित्याय० गंधं
विश्वेन० हा । सवित्रे० अक्षतान् । द्विषं तं० न् । आर्काय० पुष्पं
मो अहं द्वि० धूपं ॥ भास्कराय० धूपं स० ॥ ॥ अथांगपूजा ॥
आदित्याय० पादौ पूजयामि ॥ सवित्रे० जंघे पू० । सूर्याय० जा
नुनी० । खगाय० ऊरू पू० । पूष्णे० कटिं पू० । गभस्तिने० नाभिं० ।
मार्तंडाय० हृदयं० । जगच्चक्षुषे० शिरः पू० ॥ ॥ उद्य० दिवं । मित्र
रविभ्यां नमः । दीपं स० ॥ नैवेद्यं तुर्यि त्रोषः ॥ अंबुप्रोक्षितं ॥२७॥

गायत्र्यास्त्रिमंत्र्य॥ धेनुमुद्रां। चक्रमुद्रां। अस्त्रमुद्रां। प्रद
र्श्य॥ वामांगुष्ठेनस्पर्शान् एतैः परिहृतायमासाधिप
स्वरूपिणेश्रीसूर्याय सौवर्णपात्रस्थितनानापक्वा
न्नाद्यभावेखाद्यंनैवेद्यंस०॥ हृद्रोग०य॥ सूर्यभानुभ्यां
नैवेद्यं०।।मध्येपानीयं०उत्तरापोशं०हस्तप्रक्षा०चंदने
नकरो०।।सुकेषु०स्ति। खगपूषाभ्यां०फलं॥ अथाहा०
सि। हिरण्यगर्भमरीचिभ्यां०तांबूलं०।उदगाद०ह॥ आ
दित्यसवितृभ्यां०दक्षिणांस०।द्विषंतं०रधं॥ अर्कभास्क
राभ्यां०नीराजनंस०।।आदर्शं०।छत्रं०।चामरं०।महानी
दीपं॰

तबार्घ
॥२५॥

राजनादिराजोपचारान्स॰॥ यथाशक्त्यानिवेद्य॥ उद्य
नयेतिसर्वमंत्रैः॥ तद्विष्णोः॰ ॠकू २॥ ब्रह्मजज्ञानं ॠ १ नमः
शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च॥ मित्र
रविरिति द्वादशनामभिः पुष्पांजलिं स॰॥ यानिकानि च॰
पदे॥ नमः सवित्रे ॰ने॥ नमस्कारं स॰ नमो विरिंचिवि
ष्णुवीशभेदेन परमात्मने॥ सर्गसंस्थितिसंहारव्यापृत
व्यक्तमूर्त्तये॥ ततः पीठादीशान्यां मंडले नैवेद्यशतांशं
माठरपिंगलदंडेभ्यः समर्प॰॥ एवमावाहनादिषोडशो
पचारान्कृत्वा॥ ॥मंत्रहीनं क्रियाहीनं भक्तिहीनं च यत् ॥२५॥

मया॥ कृतंत्वदाश्रितंकर्मरूपपातस्यपूरय॥ ततःसूर्य
गायत्रींद्वादशवारंजपेत्॥ भास्करायविद्महेमहद्युतिकरा
यधीमहि॥ तन्नोआदित्यःप्रचोदयात्॥ ॥अथानुज्ञार्घ्यः॥
॥ चिंतातनयोदेवः कर्तासाक्षीसुरेश्वरः॥ सप्ताश्वः
सप्तरज्जुश्च अनुज्ञांमेप्रसीदतु॥ अनुज्ञायेदमर्घ्यं
सं०॥ ॥एहिसूर्यसहस्रांशोतेजोराशेजगत्पते॥ अनु
कंपयमांभक्त्यागृहाणार्घ्यंदिवाकर॥ श्रीसूर्यायसां
गायसपरिवारायइदमर्घ्यंसं०॥ जगन्नेत्र जगन्नाथ
जगतःकारणाव्यय॥ तमोहर नमस्तेस्तुप्रसीदपरमे
श्वर॥ श्रीसूर्यायसांगायसामान्यार्घ्यंसम०५ ॥ इतिःसूर्य
प्रसन्नार्घ्यं

स्वा घ्यं.
॥२६

आदित्योनप्रभावात्यक्षरं ॥ मधुव्हरतितद्रसं ॥ सत्यंवै
तद्रसमापोज्योतीरसोमृतं ब्रह्मभूर्भुवःसुवरों ॥ श्री
सूर्यायविशेषार्घ्यंस० ॥ ॥ अथोपस्थानं ॥ ॥ अग्निमी
ळेनमस्कृत्यं जातवेदोनमोस्तुते ॥ इषेत्वायनमस्कृत्यं
उर्जेत्वायनमोस्तुते ॥ अग्नआयाहिवीतस्त्वमायग
र्भेनमोस्तुते ॥ शन्नोदेवीनमस्कृत्यं ऊंगचक्षुर्नमो
स्तुते ॥ हिमघ्नायतमोघ्नायरक्षोघ्नायनमोनमः ॥
कृतघ्नापवक्षेधायतस्मैसर्पात्मनेनमः ॥ कालात्मा
सर्वभूतात्मावेदात्माविश्वतोमुखः ॥ ऊंनमस्तस्तु ॥२६॥

जराव्याधिसंसारस्वपनाशनः॥ दारिद्र्यव्यसनध्वंसी
श्रीमान्भानुदिवाकरः॥ नमःसवित्रे०॥ नमोनमःपाप
विनाशनायविश्वात्मनेसप्ततुरंगमाय॥ सामर्ग्यजु
र्धामनिधेविधातर्भवाब्धिपातायनमोनमस्ते॥ उ
दयेब्रह्मणोनित्यंमध्याह्नेतुमहेश्वरः॥ अस्तमानेस्व
यंविष्णुस्त्रयीमूर्तिर्दिवाकरः॥ हृत्सेनमध्येयंपुरुषंपुराणं
नारायणंशाश्वतमादिदेवं॥ संचिंत्यसूर्यायविराजमानम
त्युत्सयोगीजितवीत्तथैति॥ ॥इतिस्तुत्वा॥ ॥आत्मानंपूज
येत्॥ रविमेवविचिंतयेत्॥ अथार्घ्यः॥ ॥वेदगर्भनम

त॰चा॰ग्र॰
॥२७॥

स्तोस्तु वेदमूर्तिनमोस्तुते ॥ अव्यक्तमर्त्त्यपेतुभ्यमर्घ्यंगृह्ण
नमोस्तुते ॥ ब्रह्ममूर्तिधरोदेवश्चतुर्वक्त्रसनातनः ॥ सृष्टि
स्थितिश्चसंहर्त्तैं अर्घ्यंगृह्णनमो० ॥ विष्णुरूपधरोदेवःपी
तवासश्चतुर्भुजः ॥ प्रसवः सर्वलोकानांमर्घ्यंगृह्ण० ॥ यं
तुद्गरूपिणंदेवंभगवंतंत्रिशूलिनं ॥ योदेहि सर्वलोकेषुम
र्घ्यंगृ० ॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥ हरिद
श्वोस्तुमालीवअर्घ्यंगृ० ॥ उदयंतंमहद्भूततेजोराशिंस
मुद्भवं ॥ तिमिरक्षयकृद्देवमर्घ्यंगृ० ॥ अथोर्घ्यंदेवपात्रे
णोदकेनप्रपूर्यच ॥ र[illegible]चंदनपुष्पाणि दूर्वातिलयवां ॥२७॥
क

॥ पाराधर्यमेत्रस्येनैनत्वेनैवत्रिराकृति४॥

तथा॥ ताम्रपत्रे पुष्पाक्षिप्य पश्चादर्घ्यं प्रदापयेत्॥ ॥यथावि
धिरर्घ्यदानं कुर्यात्॥ ॥ॐकार पूर्वमुच्चार्य षड्बीजानि ततः
परं॥ मंत्रनाम नमोंतं च अर्घ्यं दद्याद्यथाक्रमं॥ ॥अथार्घ्यः
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्यन्नद्य मित्रमहः। मित्राय नमः। इदमर्
घ्यं स०।१ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। आरो० वं। रवये० अर्घ्यं०।२ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। हृद्रोगं० यं। सूर्याय० अर्घ्यं०।३ ॐ ह्रां ह्रीं ह्रूं ह्रैं
ह्रौं ह्रः। हरिमा० प। भानवे० अर्घ्यं०।४ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः।
शुकेषु० णी। खगाय० अर्घ्यं०।५ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। रोपणा०
सि। पूष्णाय० अर्घ्यं०।६ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। अथाहा० मे॥ हिरण्य

सूर्यार्घ्य ॥२८॥

गर्भाय० अर्घ्यं ।७। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ हरिमाणं० प्रकाशमरीचये
न० अर्घ्यं ।८। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ उद्गा० स्यः ॥ आदित्याय० अ
र्घ्यं ।९। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ विश्वेन० ह ॥ सवित्रे० अर्घ्यं ।१०॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ द्विषतं म० न्र ॥ अर्काय० अर्घ्यं० ॥११॥ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ मो अहं० पन्न ॥ भास्कराय० ॥ अर्घ्यं स० ॥१२॥ ॐ ह्रां सूर्यार्घ्यः ॥
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ उद्यन्न० दिव ॥ मित्ररश्मिभ्यो० अर्घ्यं० ॥१३॥ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ हृद्रोगं० नाय ॥ सूर्यभानुभ्यां० अर्घ्यं० ॥१४॥ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ शुकेषु० स्मि ॥ खगपूषाभ्यां० अर्घ्यं० ॥१५॥ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ अथो० स्मि ॥ हिरण्यगर्भमरीचिभ्यां० अर्घ्यं० ॥१६॥ ॥२८॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्गा० ह॥ आदित्यसवितृभ्यो॰ अर्घ्यं०॥१७

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ द्विषतं० धं॥ अर्कभास्कराभ्यो॰॥ अर्घ्यं०॥१८॥ अथ मन्त्रः॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्यंनद्य० शाप॥ मित्ररविसूर्यभानुभ्यो॥ अ०॥१९॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ शुकेषु० धासि॥ खगपूषहिरण्यगर्भमरीचिभ्यो॰ अ०॥२०॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्गा० रधं॥ आदित्यसवित्रर्कभास्करेभ्यो॰ अ०॥२१॥ अथ मन्त्रः॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्यंनद्य० रधं॥ त्र्यृचः॥ मित्ररविसूर्यभा

नुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो॰ अर्घ्यं०॥२२॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्यंनद्यमि० तेरधं॥ त्र्यृचः॥ मित्रर

विसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्क

भास्करेभ्यो॰ इदमर्घ्यं०॥२३॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ उद्यं

त्र्यार्घ्य०
॥२९॥

नघ०हेरर्घं॥अरुक॥मित्ररविसूर्यभानुखगपूषहिर
ण्यगर्भमरीच्यादित्यसवितृर्कभास्करेभ्यो॥०इदमर्घ्यं॥
॥२४॥ ॥ एवं चतुर्विंशत्यर्घ्यमित्येकोऽर्घ्यः॥ ॥ अर्घ्यदा
नानंतरं पूर्ववदाचम्य पूर्ववत्सकारेण स्नात्वा॥ हीनो
विभक्तिवर्णैश्च व्यंजनैरक्षरैस्तथा॥ तत्सर्वं क्षम्यतां
देवप्रसादं कुरु दिवाकर॥ अनुस्वारविहीनस्य जपस्य
खंडितस्य च॥ दोषाः प्रयांतु नाशं वै त्वत्प्रसादाद्दिवा
कर॥ यस्य स्मृत्या च०तं॥ न्यूनातिदोषरहितं कृतं कर्म ॥२९॥
मपाप्रभो॥ सर्वं संपूर्णं कृपासिंधो क्षमस्व च नमोस्तु
ते॥ अर्घ्यप्रजादिकं सर्वं कृतं यत्तव दत्तुयहान्त॥ तेनमेरू

र्मणादेवप्रीतोभवस्करप्रभो॥ नमस्तेसूर्यायशांतायसगणाया
त्मिहेतवे॥ निवेदयामिचात्मानंत्वंगतिःपरमेश्वर॥ सच्चिदा
नंदरूपायसाक्षिणेब्रह्मणेनमः॥ त्वमेवाहमहंत्वंवस
च्चिन्मात्रवपुर्धरः॥ आवयोरंतरंस्वांतिर्नंद्रूपत्वाज्ञावशा
त्तव॥ स्वमस्वपरमेशानयन्निरुद्धोसिभक्तितः॥ स्वान
दबोधसंतुष्टः कारुण्यादिगुणान्वितः॥ परिपूर्णःस्वय
वेधःपरमानंदसंस्थितः॥ यन्निरुद्धोसिदेवेशतत्स
र्वंक्षंतुमर्हसि॥ ॥ अन्यथाचारणं॥ ततःपुष्पांजलिंद
त्वाहृत्कूर्णमंत्रानुपसंहृत्यसकलपरिवारदेवतादेव
मूर्त्यामेकीकृताःपरिभाव्य॥ तद्धामपरमंदिव्यंसर्व
हृत्य ताः

त्र॰ चा॰ ॥२०॥ साधनमव्ययं॥यच्च सर्वात्मफलस्त्वं प्रसीद परमेश्व
र॥पूजितोसि मया सम्यक् श्रीसूर्य परमेश्वर॥वित्तवि
श्रामकामार्थं मम हृत्पद्ममंदिर॥नमः सवित्र इति मं
त्रं जपन्॥पादुकमुद्रया पीठादुद्वास्य॥गजमुद्रया
मंडलस्थ कुसुमान्याघ्राय यावद्घ्रायं यथापातमार्गे
ण स्वहृदये वामनासिकाद्वारेणानीय षडंगं विन्य
स्य वैपरीत्येन प्राणायामत्रयं कुर्यात्॥गंधादिभि
रात्मानमभ्यर्च्य॥तद्रूपमात्मानं भावयन्॥रवि
र्दाता रविर्भोक्ता रविः सर्वमिदं जगत्॥रविर्जयति
सर्वत्र यो रविः सोहमेव हि॥एवं तन्मयो भूत्वा सुखं ॥२०॥

विहरेत्॥ उद्यन्नद्येति मंत्रेण अर्घ्यदानोदकं पिबेत्॥ पी
तजलत्वचैनैव सौरेणाप्यभिषेचयेत्॥ तत्तौडुळस्वरूप
त्वा रोगमुक्तस्य सूक्ष्मः॥ नमो मित्रस्य सूक्तेन प्रणमे
त्रस्त्वा रविं॥ अर्घ्यपात्रस्थितं तोयं प्राशनं रोगना
शनं॥ रोगस्थो मुच्यते रोगान्नात्र कार्या विचारणा॥
अर्घ्यादिकेन सौरसूक्तेनाभिषेचनं कुर्यात्॥ मुंचामि
त्वेति मंत्राक्षतान् दद्यात्॥ महासौरं वा त्रिपाठं रक्षोघ्नं
नि स्वस्तिलिंगकं॥ एवमन्यानि सूक्तानि घोषयेत्त्रियंतःस
दा॥ इति तत्त्वविधानं॥ अथार्घ्यदानसंख्या॥ चतुर्विंश
त्यर्घ्यदाने रेकेमावर्त्तनस्मृतं॥ आवर्त्तनेऽर्घ्ये तुर्विंशौ

त चा०
॥३१॥ र्घिणीचसम्मतोबुधैः॥ चतुर्विंशत्यर्घिणीभिर्लघ्व
र्घस्तु प्रशस्यते॥ चतुर्विंशोघ्वलघूर्घैर्महार्घश्चप्र
शस्यते॥ चतुर्विंशो महार्घैश्च अत्यर्घश्च प्रशस्यते॥
लक्षत्रयेण विधिवद् दकविंशासहस्रकैः॥ एवं च कथितं
पूर्वं कश्यपेन च महर्षिणा॥ षट्सप्ताधिके ४ पंच शतैरर्घी
प्रकीर्त्तिता॥ ५७६॥ वेदनेत्रवसुविश्वैर्लघ्वर्घश्चप्रकी
र्त्तितः॥१२८२४॥ षट्सप्तसप्तपूर्वन्हि रामैर्युक्तो महा
र्घकः॥३२१७७६॥ वेदनेत्ररसाद्रसं रुलुरकैर्वाजिभिः॥ ॥३१॥
॥७९६२६२४॥ अत्यर्घसंख्या कथिता कश्यपेनर्षिणा पुरा॥
एवं च विधिना सम्यक् गंधपुष्पाक्षतैस्तिलैः॥ अर्घ्यदानं

॥अथहोमः॥

प्रकर्त्तव्यमेकपुरश्चानसंख्यया॥ सुप्रसन्नोभवेत्तस्य
यैमहारोगार्त्तिनाशनः॥ तस्मात्सर्वप्रयत्नेनअर्घ्यदा
नंसमारभेत॥ एवमर्घ्यविधिंकृत्वा शांत्यर्थं होममा
रभेत॥ आघारांतं विधिंकृत्वा ततोयजनमारभेत्॥
जुहुयात्पायसाज्येनसुसमिद्भिस्तथानले॥ फलैर्ना
नाविधैश्चापि होमयेत्सुसमाहितः॥ अर्कपुष्पैः
समिद्भिश्चकरवीरैः सुरक्तकैः॥ रक्तचंदनहोमेनता
चारक्ताक्षतैरपि। दूर्वांकुरैश्चसायैश्चप वैरपि
तिलैः स्वकर्मैः॥ शतंवाथसहस्रंवा अयुतं लक्षमे
व वा॥ गायत्र्यासौरमंत्रैश्चतत्त्वमंत्रैस्त्रिघोषतः॥ या

त्चा०
॥२२॥

हुत्सावाप्यहोतव्यं प्रीतये सूर्यदेवता॥ एवमाराधितः
सूर्यः सर्वान्रोगान्व्यपोहति॥ ॥इतिहोमप्रकारः॥ ॥
अथदक्षिणालक्षण॥ जापकान्यथाविधिप्रजपे
त्॥ अर्घ्यस्यायुतसंख्यार्थ दक्षिणागौरलंकृता॥ यावद्य
युतसंख्याकगोसंख्यातावती स्मृता॥ दंडवन्नियमेष्वत्र मा
र्घ्यदानक्रमणतु॥ ब्राह्मणान्भोजयेत्पश्चाद्दशावत्या
रितिस्मृता॥ नित्यलाहिरुदीकुर्यादर्घ्यदानंरवेर्दिने॥ द्वाद
शाब्दायत्नात्प्रातर्भोजयेद्द्विवासरे॥ नमोमित्रस्येति सूक्तं
प्रणम्य च रश्मीन्॥ पृथक्प्रदक्षिणं कृत्वा सचिरायुः सुखी भवेत्॥
कारयेदर्घ्यपात्रं तु रौप्यं ताम्रमथापि वा॥ अथार्घ्ये देवपार्श्वे च
उदकेनप्रपूर्य च॥ रक्तचंदनपुष्पाणि दूर्वां तिलयवाक्षताः
शातपत्रं च निक्षिप्य पश्चादर्घ्यं प्रदापयेत्॥ वेदगर्भेन मस्तेस्तु

विज्ञान्द्वादश्ना

॥२२॥

अ

मूर्त्तिनमोस्तुते ॥ व्यक्ताव्यक्तस्वरूपेलुप्यम अर्घ्यं गृहाण नमोस्तु
ते ॥१॥ ब्रह्ममूर्त्तिधरो देवश्चैतुर्वक्त्रः सनातनः ॥ सृष्टि
स्थितिसंहर्त्रेऽर्घ्यं गृहाण नमोस्तुते ॥२॥ विष्णुरूप
धरो देवः पीतवासाश्चतुर्भुजः ॥ प्रसवः सर्वलोकाना
अर्घ्यं ॥३॥ यरुद्ररूपिणं देवं भगवंतं त्रिशूलिनं ॥
योदेहेसर्वलोकेषु अर्घ्यं ॥४॥ जन्ममृत्युजराव्या
धिसंसारभयनाशनः ॥ हरिदश्वो रूमालीव अर्घ्यं ॥५॥
उदयंतं महद्भूतं तेजोराशिसमुद्भवं ॥ तिमिरक्षय
रूदेव अर्घ्यं गृहाण नमोस्तुते ॥६॥
॥ भुक्तिस्त्वं मोक्षदस्त्वं च प्रयातितद्दिवाकरः ॥ इतिमंत्र
[illegible] ॥ समुच्चार्य नमस्कुर्वीत भास्करः ॥७॥ हेमन्तु

त्वबा
॥२२॥

विषक्षितिसर्पास्यावलोकनं ॥ इत्यर्घ्यदानपद्धतिः स
माप्ता ॥ ॥ अथ सुखतयानुष्ठानसौकर्यार्थमनेक
कल्पसारमुद्धृत्य लिख्यते ॥ उद्धं नयेति मंत्रोयं सोरः
पापप्रणाशनः ॥ रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिप्रदा
यकः ॥ १ ॥ कण्वेन च पुरा ह्येषो गुह्यः परमसिद्धिदः ॥ प
रमाराधितो देवत्व च मंत्रेणास्य भास्करः ददाति परमां
सिद्धिं मनसाभीप्सितं ध्रुवं । शिरोरोगाक्षिरोगा
णां कुक्षिशूलादिनामपि ॥ इत्यादीनां विनाशाय रो
गाणां प्रकटीकृतः ॥ प्राप्यसर्व [illegible] मंत्राणां ॥२२॥

त्र च मंत्रोऽयं वं मतः ॥४॥ त्रिदिनं कारये यस्तु त्रिनवार्घ्योनत
द्दितः ॥ शिरोरोगात्समुच्येत नात्र कार्या विचारणा ॥५॥ एवं
सप्तदिनं कुर्या शूलो नश्यति नान्यथा ॥ मासमेकं तु यः कुर्या
त्कुष्ठो नश्यति नान्यथा ॥६॥ षण्मासमेवं यः कुर्याद्रोगराजा
त्समुच्यते ॥ दिनमेकं तु यः कुर्याल्ल ज्वरान्नश्यंति तत्क्षणात् ॥७॥
रक्ताक्षतै रक्तपुष्पै रक्तचंदनमिश्रितैः ॥ आरक्तैः करवीरैश्च ज
पाकुसुमपाटलैः ॥८॥ अन्यैर्नानाविधै रक्तैः कुसुमैस्तु विच
क्षणैः ॥ दूर्वातिलयवैश्चैव बिल्वपत्रैरथापि वा ॥९॥ भास्करा
ग्रैर्विनीतात्मा दद्यादर्घ्यं पुमान् सुधीः ॥ [illegible] जलेवापि स्थ

त्रसा.
॥३४॥

लेवापिश्रमप्लदलेलिखेत् ॥१०॥ भास्करं परिवारेण
पूजयेत्संयतेंद्रियः ॥ प्राणायामं तत्वैन्नूवस्वांगुलीषु
तथैव च ॥११॥ षडंगमन्त्रषडघ्यं च कुर्या घ्रलेन पूर्वकं ॥
पादार्घ्यवस्त्रं चैनैवतत्वैनैवविसर्जति ॥१२॥ एवमर्घ्यः
प्रदातव्यः सर्वरोगापहृत्तये ॥ हस्तौ च हृदयं मूर्ध्नि च
घ्राणनासौ मुखं चैव तु ॥१३॥ एवं यः कुरुते न्यासं द्वादशां
तपदक्रमात ॥ बीजपूर्वं नमोंतं च करन्यासं यथाविधि ॥१४॥
नानासारस्मुलुत्यादित्याध्योनुक्रमः कृतः ॥ त्वचम ॥ ३४ ॥
त्रेणामपानामनका नाशयायहिं ॥१५॥ प्रकारः सु

धियाकाशीनामकेनादराद्दरं॥ यत्नेन लेखितोकानां
मुपकारायकेवलं॥ ॥इतितत्त्वविधाने॥ सप्तसप्ततिप्रचतु
ष्टयेखिलजन्मिनो॥ एवंचार्घ्यविधिंवक्तुं त्रयोदशप्रकारेण
न्यासस्फुटीकरणं॥ कार्यार्घ्यसंख्या॥ पादार्घ्य ४।१२॥
अर्धवार्घ्य ४८ [illegible]राघ्य ४२ तच्चेनत्रिरायत्ति ४३॥ एवं चतुर्विंश
त्यर्घ्यमित्येकोर्घ्य॥ ते[illegible]चतुर्विंशतिभिरेवैकोर्घ्यः। ५७६॥
एक तैश्च[illegible]चतुर्विंशति[illegible]र्घ्य ४॥ संख्या १३८२४ एवं च
तुर्विंशत्यावर्त्तनो एकमहार्घ्य ४॥ तस्य संख्या ३३१७७६ तस्य
चतुर्विंशत्यावर्त्तनोऽस्यर्घ्य ४ संख्या॥ ७९६२६२४॥ ॥जपाद्
शांशतो होमः तर्पणंतद्दशांशतः॥ मार्जनंतद्दशांशेन तद्दशां

त्रचा० क्रोनुभोजनं ॥५॥ कारवघु २२७३५ ॥ ॥ ॐ ह्रां उद्यं० हः ॐ
॥३५॥ ह्रीं मित्रायनमः इदमर्घ्यं समर्पयामि ॥ ॐ ह्रीं आरो० व ह्रीं
ॐ ... रवये० इदं० ॥ ॐ ह्रूं हृद्रो० यं ह्रूं ॐ सूर्याय० इदं० ।
ॐ ह्रैं हरि० यं ह्रैं ॐ भानवे० इदं० ॥ ॐ ह्रौं शुकेषु० तो ह्रौं ॐ
खगाय० इदं ॥ ॐ ह्रः रोपणा० सिद्धः ॐ पूष्णे० इदं० । ॐ
ह्रां अपो० मे ह्रां ॐ हिरण्यगर्भाय० इदं० । ॐ ह्रीं हरिमा० सि
ह्रीं ॐ मरीचये० इदं० ॥ ॐ ह्रूं उदगा० यः ह्रूं ॐ आदित्याय०
इदं० । ॐ ह्रैं विश्वेन० सह ह्रैं ॐ सवित्रे० इदं । ॐ ह्रौं द्वि
षंत० यन् ह्रौं ॐ अर्काय० इदं० ॥ ॐ ह्रः मोअहं० रधं ह्रः ॥३५॥
ॐ भास्कराय० इदं० ॥ ॐ ह्रां ह्रीं उद्यंन० वं ह्रां ह्रीं ॐ मित्र

रविभ्यां० इदं०॥ ॐ ह्रूं ह्रैं हृद्रोग० नाशय ह्रूं ह्रैं ॐ सूर्यभानु
भ्यां० इदं०॥ ॐ ह्रौं ह्रः शुकेषु० धमसि ह्रौं ह्रः ॐ खगपूषाभ्यां० इदं०॥
ॐ ह्रां ह्रीं अथोहा० धमसि ह्रां ह्रीं ॐ हिरण्यगर्भमरीचिभ्यां०॥
इदं०॥ ह्रूं ह्रैं उद्गा० सह ह्रूं ह्रैं ॐ आदित्यसवितृभ्यां० इदं०॥
ॐ ह्रौं ह्रः द्विषंतं० तेरधं ह्रौं ह्रः ॐ अर्कभास्कराभ्यां० इदं०॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्न० नाशय ह्रां ह्रीं ह्रूं ह्रैं ॐ मित्ररविसूर्य
भानुभ्यो० इदं०॥ ॐ ह्रौं ह्रः ह्रां ह्रीं शुकेषु० निदध्मसि ह्रौं
ह्रः ह्रां ह्रीं ॐ खगपूषहिरण्यगर्भमरीचिभ्यो० इदं०॥ ॐ
ह्रूं ह्रैं ह्रौं ह्रः ॐ आदित्यसवित्रर्कभास्करेभ्यो० इदं०॥ ॐ
ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्न० रधं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ
उद्गा० तेरधं॥ ह्रूं ह्रैं ह्रौं ह्रः

त्या०
॥३६॥

मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यस
वित्रर्कभास्करेभ्यो नमः। इदम०॥३॥ अथ मंत्रप्रकारः॥
ॐ ह्रां उद्यन०हः मित्राय०इदम० ॐ ह्रीं आरो०दिवं।रवये०इदम०॥
ॐ ह्रूं हृद्रो०सूर्य।सूर्याय०इद०॥ ॐ ह्रैं हरि०शाय।भानवे०इद०।
ॐ ह्रौं शुकेषु०ॐ।खगाय०इद०। ॐ ह्रः रोप०सि।पूष्णे०इदम०॥
ॐ ह्रां ह्रयो०मे।हिरण्यगर्भाय०इद०। ॐ ह्रीं हरिमा०सि।मरी
चये०इद०॥ ॐ ह्रूं उद०त्यं०आदित्याय०इद०। ॐ ह्रैं विश्वे०सह।
सवित्रे०इद०। ॐ ह्रौं द्विषं०यन्तु।अर्काय०इद० ह्रः मोऽहं०रथं।भास्क
राय०इद०। ॐ ह्रां ह्रीं उद्यन०दिवं।मित्ररविभ्यां०इद०। ॐ ह्रूं ह्रैं ॥३६॥
हृद्रोगं०शाय।सूर्यभानुभ्यां०इद०। ॐ ह्रौं ह्रः शुकेषु०धमसि।खगा

पूषभ्यां॰ इदं॰। ॐ ह्रां ह्रीं अधो॰ धमसि हिरण्यगर्भमरीचिभ्यां॰
इदं॰॥ ॐ ह्रूं ह्रैं उदगा॰ सह॰ आदित्यसवितृभ्यां॰ इदं॰॥ ॐ ह्रौं ह्रः
द्विषंतं॰ रधं॰ अर्कभास्कराभ्यां॰ इदं॰॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्न
द्य॰ शाया मित्ररविसूर्यभानुभ्यो॰ इदं॰॥ ॐ ह्रौं ह्रः ह्रौं ह्रीं शुके
षु॰ निदध्मसि खगपूषहिरण्यगर्भमरीचिभ्यो॰ इदं॰॥ ॐ ह्रूं ह्रैं
ह्रौं ह्रः उदगा॰ तेरधं॰ आदित्यसवितृअर्कभास्करेभ्यो॰ इदं॰॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य॰ तेरधं॰ मित्ररविसूर्यभानु
खगपूषहिरण्यगर्भमरीचिआदित्यसवितृअर्कभास्करेभ्यो
नमः इदम्॥ एवं तिवेनद्विः॥ अयमेव प्रकारः॥ ॐ ह्रीं उ
द्यन्न॰ ह॰ ॐ ह्रां मित्राय॰ इदमर्घ्यं समर्पयामि॥ ॐ ह्रीं आरो॰ वे॥

त्र्चा०

॥३७॥

ॐ ह्रीं रवये॰ इदं०। ॐ ह्रूं हृद्रो० य ॐ ह्रूं सूर्याय० इदं०॥ ॐ
ह्रैं हरि० नाशय। ॐ ह्रैं भानवे० इदं०॥ ॐ ह्रौं शुकेषु० ण ॐ ह्रौं ख
गाय० इदं०। ॐ ह्रः रोपणा० दध्मसि ॐ ह्रः पूष्णे० इदं०। ॐ ह्रां
अथो० षु मे ॐ ह्रां हिरण्यगर्भाय इदं०॥ ॐ ह्रीं हरिमा० सि।
ॐ ह्रीं मरीचये० इदं०॥ ॐ ह्रूं उदं० दितः ॐ ह्रूं आदित्याय इ०॥
ॐ ह्रैं विश्वेन० सह ॐ ह्रैं सवित्रे इदं०। ॐ ह्रौं द्विषं० यन्नू
ॐ ह्रौं अर्काय इदं०॥ ॐ ह्रः मो अहं द्विषं० धं ॐ ह्रः भा
स्कराय इदं०॥ इति पादार्घ्यः॥ अथा धर्वार्घ्यः॥ ॐ ह्रां ह्रीं
२ विभा॥ उद्यं० दिव ॐ ह्रां ह्रीं मित्ररवये० इदं०॥ ॐ ह्रूं ह्रैं हृद्रो० नाशय ॐ ॥३७॥
ह्रूं ह्रैं सूर्यभानुभ्यां इदं०॥ ॐ ह्रौं ह्रः शुके० णं० सि ॐ ह्रौं ह्रः

खगपूषभ्यां इदं० ॥ ॐ ह्रां ह्रीं अघोऽसि ॐ ह्रां ह्रीं हिरण्य
गर्भमरीचिभ्यां इदं० ॥ ॐ ह्रूं ह्रैं उदं० सह ॐ ह्रूं ह्रैं आदित्य
सवितृभ्यां इदं० ॥ ॐ ह्रौं ह्रः द्विषतं० ध ॐ ह्रौं ह्रः अर्कभास्क
रेभ्यां० ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्न० न्नाय ॐ ह्रां ह्रीं ह्रूं ह्रैं मित्रर
विसूर्यभानुभ्यः इदं० ॥ ॐ ह्रौं ह्रः ह्रां ह्रीं शुकेषु० निदध्मसि
ॐ ह्रौं ह्रः ह्रां ह्रीं खगपूषहिरण्यगर्भमरीचिभ्यः इदं० ॥ ॐ
ह्रूं ह्रैं ह्रौं ह्रः उदगा० रधं ॐ ह्रूं ह्रैं ह्रौं ह्रः आदित्यसवित्र
र्कभास्करेभ्यः इदम० ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्न० रधं
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मित्ररविसूर्यभानुखगपूषहिरण्य
गर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः इदमर्घ्यं नमः २

त्र्वा०
११७

त्त्वेनत्रिपावृत्त्या ॥ जगच्चक्षु जगन्नाथ जगतीकारमव्ययं ।
तमोहरनमस्तुभ्यं गृहाणार्घ्यं दिवाकर ॥१॥ इत्ययमंत्रार्घ्यं ॥
॥ इति कल्पोक्तमंत्रप्रकारः ॥ अथ वौनक्रमतो ॥ ॥ अर्घ्यं वानुलो वै
म्येन प्रातिलोम्येन तथैव च ॥ एवमर्घ्यं प्रदातव्यं पुरुषस्तु विनश्य
ते ॥ तदेवन ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यं नघं ० हः ह्रः ह्रौं ह्रैं
ह्रूं ह्रीं ह्रां मित्रायइदमर्घ्यं नमः । एवमेव पादार्घ्यं ॥१२॥ ॐ ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यं न० ० दिपं ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां मित्ररविभ्य०
इदं० ॥ एवमेवार्घ्यं ॥८॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यं० त्राय -तिक
ॐ ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां मित्ररविसूर्यभानुभ्यः इदं० ॥ अर्घ्यं ०ः ।७।
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यं० रथ ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां मित्ररवि ११७

सूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवितृअर्कभास्क
रेभ्यः इदमर्घ्यं नमः ॥ एवं त्रिरावृत्तिः ॥ पादार्घ्यं च अनेनैव त्य
चेनैव त्रिरावृत्तिः ॥ पादादर्घ्यं समंत्रं च अनुलोम्यैः पुनः पुनः ॥
चतुर्विंशातिर्चार्घ्येण यो र्चयेन्नानुमन्वहं ॥ पुत्रभार्याधनत्नां
च आरोग्यं सर्वदा भवेत् ॥ श्रियमाप्नोति विपुलां अंतेसमाप्नो
त्यनामयं ॥ हृद्रोगदेहिरूपेणाद्विषितः परिधीयते ॥ मार्त्तं
डंभानुमादित्यंहंसंसूर्यं दिवाकरं ॥ तपनं भास्करं वि
वमध्ये [illegible] मासाधिपन्यसेत् ॥ दीप्ता सूक्ष्मा जया भ
द्राविभूतिर्विमला तथा ॥ अमोघा विद्युता चैव मध्यस्त्री

सर्वतोमुखी ॥ इतिशौनकप्रकारः ॥ अथकल्पवोक्ते ॐ
कारं सूर्यमुख्यार्यबीजमेकं तथैवच ॥ मंत्रनामनमोंत
चद्द्यादर्घ्यं यथाक्रमात् ॥१॥ ॐ ह्रां उद्यन्नद्यमित्रमहः
मित्रायाइदमर्घ्यंनमः ॥२॥ ॐ ह्रीं आरोहन्नुत्तरांदिवं
रवयेइदं० ।३। ॐ ह्रूं हृद्रोगंममसूर्य। सूर्यायइदं० ।४।
ॐ ह्रैं हरिमाणंचनोशायभानवेइदं० ।५। ॐ ह्रौं शुके
षुमेहरिमाणं खगायइदं० ।६। ॐ ह्रः रोपणाकासुद
ध्मसि पूष्णेइदं० ।७। ॐ ह्रीं अथोहारिद्रवेषुमेहिरण्य
गर्भायइदं० ।८। ह्रीं हरिमाणंनिदध्मसि मरीचयेइदं० ।९। ॥३९॥

ॐ श्रूं उदगादयमादित्यः आदित्याय इदं० ॥ ॐ श्रैं विश्वे
न सहसा सह सवित्रे इदं० ॥ ॐ श्रौं द्विषंतं मह्यं रंधयन्न अ ३५
र्काय इदं० ॥ ॐ श्रः मो अहं द्विषते रंध भास्कराय इदं० ॥
ॐ श्रां श्रीं उद्यन्न० वंमित्र रविभ्यां इदमर्घ्यं नमः ॥ ॐ श्रूं
श्रैं हृद्रोगं० राय सूर्यभानुभ्यां इदं० ॥ ॐ श्रौं श्रः शुकेषु
मे० दध्मसि खगपूषभ्यां इदं० ॥ ॐ श्रां श्रीं अथो० नि
दध्मसि हिरण्यगर्भमरीचिभ्यां इदं० ॥ ॐ श्रूं श्रैं उदगा०
सह आदित्यसवितृभ्यां इदं० ॥ ॐ श्रौं श्रः द्विषंतं० रंध
अर्कभास्कराभ्यां इदं० ॥ ॐ श्रां श्रीं श्रूं श्रैं उद्यंन० राय

तचा०
॥४०॥

मित्ररविसूर्यभानुभ्यः इदं० ३॥ ॐ श्रों श्रः श्रां श्रीं हुं के
षुं निरसि खगपूषहिरण्यगर्भमरीचिभ्यः इदं० ३॥ ॐ
श्रूं श्रैं श्रौं श्रः उदगा० रथं आदित्यसवितृअर्कभास्करेभ्यः
इदं० ३॥ ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः उद्यन्० तेरथं मित्रर
व्यादित्यभास्करेभ्यः इदमर्घ्यं नमः ॥७॥ अनेनैव प्रका
रेणार्घ्यं दद्याद्दिवसत्रये ॥ भास्कराय विनीतात्मा रोगक्ले
शादिनाशनः ॥१॥ न[illegible] संख्यापाद ६३ चतुर्विंशतिवारं द्
यमर्घ्यं ॥ तत्र संख्या १२८४ चतुर्विंशतिभिरर्घैरेकोऽर्घः
तत्र संख्या ३०८०६ तैश्चतुर्विंशतिभिरर्घैरेको महार्घः तत्र सं ॥४०॥
ख्या १५२२८४ तैश्चतुर्विंशतिभिर्महार्घैस्त्र्यर्घः तत्र संख्या २५१४
८१६॥ ॥ इति चतुःप्रकारो कल्पः समाप्तिः ॥

र०

॥ अथ कण्वकल्पः ॥ उद्यन्नद्येति मंत्रोयं सौरः पापविनाशनः ॥
रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः ॥१॥ कण्वेन च पुरा दृष्टो
ऋग्यजुश्चांतरं परः ॥ पुत्रस्य रोगनाशाय ख्यातो लोकहिताय च ॥२॥ ख्या
तेन चाराधितो देवस्तच्च मंत्रेण भास्करः ॥ यद्यदिष्टं करोत्येव
विध्यानुक्रमसारतः ॥३॥ अनेनैव विधानेन न्यासपूर्वं क्रमेण तु ॥
गुरोर्लब्धानुग्रहो पार्श्वे पूजां कृत्वा समाहितः ॥४॥ उदकांतिक
मासीनः प्राणायामं विधाय च ॥ स्वयोपास्तिं करिष्येहमात्मनो
भीष्टसिद्धये ॥५॥ नार्घ्यप्रदानादपरं पुण्यमारोग्यदायकं ॥ ग्य
ये प्रकुर्वंति सततमर्घ्यदानं विधानतः ॥६॥ तेषां भुक्ति
श्च मुक्तिश्च भवत्येव न संशयः ॥ हस्तयोर्हृदये मूर्ध्नि प
॥७॥

तृचा०

॥ ७१

॥ध्येयः सदा सवित०॥

घ्राणं नासौ मुखे लघ्वा ॥ चक्षुषोः कवचे चास्त्रे पादाख्यादिवदन्यसेत् ॥७॥
अंगुष्ठतर्जनीभ्यां च मध्यमाभ्यां तथैव च ॥ अनामिकाकनिष्ठा
भ्यां करयोस्तलपृष्ठयोः ॥८॥ अथ ध्यानं ॥ भूतले पीठिकायां वा
पि स्थले वापि पद्ममष्टदलं लिखेत् ॥ तत्रोपरि न्यसेद्देवं सौवर्णं वा
त जतं तथा ॥९॥ तत्रास्मिन्महापीठे सूर्यमावाहयेत्ततः ॥ आधार
कूर्मशेषं च वाराहं पृथिवीं ततः ॥१०॥ कंदं नालं तथा पत्रं पद्मं कर्णि
कामेव च ॥ एतास्तु देवतास्तत्र पीठे पूर्वतरतो न्यसेत् ॥११॥ प्रथमा
वरणे पूज्यौ श्रियादित्यौ तु पूर्ववत् ॥ द्वितीयावरणे पूज्या प्रभूताद्य
ष्टदेवता ॥१२॥ तृतीयावरणे पूज्या मन्त्राद्या ह्यादशैव तु ॥ आदि
त्याद्यान्ष्टपत्रे पंचमावरणे र्चयेत् ॥१३॥ षष्ठे दीप्त्यादिसहिता ॥ ७१ ॥

न्मार्त्तंडादीन् प्रपूजयेत्॥ सप्तमावरणे पूज्यास्त्र्यक्षाद्याः पूर्वतः
क्रमात्॥१४॥ अष्टमे षोडशारे तु इंद्रादीनायुधानि तु॥ नवमाव चैव
र्णे पिशाचाश्च कालिकायां तु मातृकाः॥१५॥ पूजिता पूजकस्या
स्य सर्वसिद्धिप्रदायकाः॥ शिवविष्णुवर्सौ पूज्यो मध्ये वर्त्तु
हि लमंडले॥१६॥ मंडलाद्बहिरेतेषां मंडलं संप्रवक्षते॥ गौरी
प्रमुखाद्यत्र पूज्या उत्तरतः क्रमात्॥१७॥ भैरवान्पू
र्वदिग्भीषण्णांतां समर्चयेत्॥ दशमावरणे तद्धि सौर
ल मंडमुत्तमं॥१८॥ भुक्तिमुक्तिप्रदं नृणामायुरारोग्य व
र्धनं॥ ॥अथ मुद्रा॥ षोडशार्णेन गायत्र्यास्त्र्यर्घयुक्तैस्त
थैव च॥१९॥ अग्निमीले इत्यादि॥ ॐकारं पूर्वमुच्चार्य बीज
रूजं विधानं सूर्यस्य उपस्थानमिदं पठेत्॥

स्या०
॥ ४२ ॥

मेकं तथैव च । मंत्रनाममनुमोतिं च दद्यादर्घ्यं यथाक्रमं ॥ २० ॥
पादार्घ्यं च ऋचं नैवल्लं चैवं नैव च त्रिपादाः ॥ ऊर्ध्वं नंद्यच्च नुर्वि
शामनुलोम्यं पुनःपुनः ॥ २१ ॥ एकैकनाममंत्रोऽर्घ्यं चहुहुद्वैचला
रिएवं च । बीजमुच्चार्यमाघ्रं तं प्रश्चादर्घ्यं प्रदापयेत् ॥ २२ ॥
तत्वांते द्वादशनामानि नियोज्यानि च नित्यशः ॥ अ
र्घ्यपात्रं समादाय ताम्रमूर्ध्नद्भलान्वितं ॥ २३ ॥ जानुस्था
मवनिंगत्वा सूर्यायार्घ्यं प्रदापयेत् ॥ रक्तचंदनगंध
न रक्तपुष्पाक्षतैरपि ॥ २४ ॥ दूर्वाजलं यवाद्यैस्तु
नासाग्रं च निरीक्षयेत् ॥ नित्यालोहिकुणांकुस्यादर्घ्यं ॥ ४२ ॥

दानं रवेर्दिने ॥२५॥ नमो मित्रस्येति सूक्तं प्रणम्य सकृच्चा
रविं पृथक् प्रदक्षिणां कृत्वा सचिरायुः सुखी भवेत् ॥२६॥
चतुर्विधास्यार्घ्यदाने रेकमावर्त्तनं स्मृतं ॥ आवर्तनैश्चतु
र्भिर्वा रुर्घिणीति प्रकीर्त्तिता ॥२७॥ चतुर्भिरास्यार्घिणीभिर्ल
घ्वर्घ्यः संप्रकीर्त्तितः ॥ चतुर्भिर्वा श्वलघ्वर्घ्ये महार्घ्यश्च
प्रशस्यते ॥२८॥ चतुर्भिर्वा महार्घ्यैस्तु अस्यार्घ्यः पुनरुच्यते
लक्षत्रयेण विधिवदेकत्रिंशत्सहस्रकैः ॥२९॥ पद्मसप्त
त्यधिकैः सपत्नाते रर्घ्यप्रदानतः ॥ सुप्रसन्नो भवेद्रविः

त्र्या० ॥४२॥

आघारांतविधिंकृत्वा सतोहोमं समारभेत् ॥

योसर्वयागसिद्धिनांदाता नः ॥ ३८ ॥ तस्मात्सर्वप्रयत्नेन अर्घ्यदानं समा
चरेत् ॥ एवमर्घविधिंकृत्वा ततो यजनमारभेत् ॥ ३९ ॥ अर्घ्यस्था
नेतु संस्थाप्य ताम्रपात्रं जलान्वितं ॥ अभिषेके कृते त्वेषां गृह्य प्रोक्ष्य
च मंत्रयेत् ॥ ४० ॥ जुहुयात्पायसाज्येन [illegible] विविधेनच ॥ फलैर्नाना खाद्येन
विधैश्चैव होमयेत्सुसमाहितः ॥ ४१ ॥ अर्कपुष्पैः समिद्भिश्च करवी
रैस्तथापरैः ॥ रक्तचंदनहोमश्च तथा रक्ताक्षतैरपि ॥ ४२ ॥ दूर्वांकु
रैश्च सार्यैश्च यवैरपि तिलैरपि ॥ ॥ प्रातर्वाथ सहस्रं वा अयुतं तु ल
क्षमेव वा ॥ ४३ ॥ गायत्र्यासौरमंत्रैश्च तत्वमंत्रैर्विशेषतः ॥ व्या
हृत्या चाथ होतव्यं प्रीयते भास्करायच ॥ ४४ ॥ एवमाराधयन्
सूर्यं सर्वान्कामानवाप्नुयात् ॥ ॥ जपपूजाविधिः ॥ ॥ आनयेद ॥४२॥

र्घ्यपात्रं तद्धौम्यं ताम्रमयमपि वा ॥ ३६ ॥ अघार्घ्यदेवतापा
त्रं चंदनेन प्रपूजयेत् ॥ ३७ ॥ चंदनपुष्पाणि दूर्वा तिलयवाक्षत
या ॥ ३८ ॥ न्नात पत्रे च निक्षिप्य पश्चादर्घ्यं प्रदापयेत् ॥ ॥ अ
घमुद्रालक्षणं ॥ आवाहनमनामिक्या लग्नांगुष्ठकरौ स्मृ
तौ ॥ ३९ ॥ स्थापनं विपरीताभ्यां कराभ्यां तदुदीरितं ॥ संनि
धिर्मुष्टिबंधेन सांगुष्ठेन निरोधनं ॥ ४० ॥ तर्जन्याभ्रमणे
नैवमवकुंठनमुच्यते ॥ अंगुष्ठाक्रांत अंगुष्ठमनागो कुंचि
तांजलिः ॥ ४१ ॥ परमीकरणोपोलामहामुद्राविचक्षणैः ॥
अघास्या कर्त्तव्यता प्रकारः कथ्यते ॥ ॥ जलमंजलिसंप्रणीम

त्वा
॥४४॥

र्घदानेप्रमाणिकं ॥४२॥ विग्रहापणियुग्मेन लाग्रपात्रे सुनि
र्मलं ॥ जानुभ्यामवनिंगत्वोपरि स्थजिलेन च ॥४३॥ अक्षताद
राषटू कंलु पुष्पमेकंतु दूर्वया ॥ अंगुष्ठोपकनिष्ठिकाभ्यां द्वा
लपत्राणि निक्षिपेत् ॥४४॥ दद्यादर्घ्यं मनर्घ्यं च सवित्रे ध्या
नपूर्वकं ॥ उपमोलौ समानीय तत्पात्रं नान्यदङ्गमनाः ॥४५॥
प्रतिमंत्रं नमस्कुर्यात् दृष्ट्वा दृष्ट्वा दिवाकरं ॥ पादार्धं च त्र
चैनैवत्त चैनैव त्रिचार्घलिः ॥४६॥ ग्रंथांतरे ॥ प्रतिपादं त्रि
सावत्याप्रत्यर्घं तु त्रिराद्रलिः ॥ बीजमेकं समुच्चार्य पादना
म तथैव च ॥४७॥ एकं मर्धं च बीजैकं नाम द्वयमतः परं ॥ ॥४४॥
व

रुद्रैरुदीरितं

ततोऽस्त्रबीजद्वयं प्राक्तं नाम चैव चतुष्टयं ॥ ४८ ॥ त्रितत्त्वास
र्वबीजानि नामानि च तथैव च ॥ अयमेक प्रकारोयं कल्प
वल्लि प्रकाशितं ॥ ४९ ॥ सर्वै बीजैरेकपादं नाममेकं तथैव च ॥
बीजान्युद्धार्य सर्वाणि अर्धद्वयं नाम तः ॥ ५० ॥ सर्वाण्ये तत्त्वेपि च
तत्त्वबीजेपि नाम चैव चतुष्टयं ॥ खंचैवेति पुनस्तद्वन्ना
मतो अर्घ्यमाचरेत् ॥ ५१ ॥ अनेनैव प्रकारेण सूर्यायार्घ्यं
प्रदापयेत् ॥ सर्वान्कामानवाप्नोति सूर्यलोकं स गच्छति ॥ ५२ ॥
आवर्त्तनं ॥ अर्घ्याणि च ॥ लघ्वर्घ्यः ॥ महार्घ्यः ॥ अत्यर्घ्यः ॥
अथ द्वादशादित्याः ॥ अंशुर्वा माघमासे तु सूर्यो वै फाल्गु

त॰चा॰
॥४५॥
यमो

पौतथा॥ चैत्रेमासेतु गोविंदो धाता नु वैशाखतापनः॥५३॥
ज्येष्ठमासितपेदिंद्रः आषाढेतपते रविः॥ गभस्ति श्रावणेमासि
भगोभाद्रपदेतथा॥५४॥ सुवर्णरेताश्चाश्वयुजे कार्त्तिके
च दिवाकरः॥ मार्गशीर्षेतपेन्मित्रः पौषेविष्णुः सनातनः॥५५॥ ना
इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः॥ जपकर्त्रे
द्विजाग्रेभ्यो दक्षिणां तु प्रदापयेत्॥५६॥ माषमात्रं अ उ
र्घ्यपालं च घृतं निष्कमेव च॥ महार्घ्ये निष्कतुल्यं वा
अत्यर्घ्येण एवमित्यापि॥५७॥ अनेनैव प्रकारेण कांच
नं तु प्रदापयेत्॥ स्वस्त्यस्तु ष्टं २ ततोभ्रत्रासवान्कामा ॥४८॥
चा

नवाप्नुयात् ॥ इत्यर्घ्याकर्म्मः समाप्तः ॥ अथावर्त्तनसंख्या ॥ २८
अर्घ्यालि ५७६ लघ्वर्घ्यः १२८२४ महार्घ्य २२१७७६ अत्यर्घ्यः
७१६२६२४ इत्यर्घ्यसंख्या ॥ शौनकोहं प्रवक्ष्यामि सौरपुराणे
पि ॥ होमेन नश्यते व्याधि होमेन नश्यते ग्रहान् ॥ होमेन नश्य
ते रोग होमे सिद्धिमवाप्नुयात् ॥ साद्गुण्यमर्घ्यदानेन सर्वकाम
समृध्यये ॥ गृहस्येशान भागे तु स्थंडिलं कारयेद्बुधः ॥ स्वगृ
ह्योक्तविधानेन होमं कुर्याद्विचक्षणः ॥ अर्कसमित्सहस्रेण
आज्ययुक्तेन होमयेत् ॥ तिलाज्यपायसेनैव शर्कराघृत
संयुतान् ॥ रक्तपुष्पैश्च मंदारैः रक्ताक्षतैश्च पूर्वया ॥ नानाप
क्वैश्च द्रव्यैश्च होमं कुर्याद्यदनेकधा ॥ ॐ घृंग्रघृतिमंत्रेणस

त्रचा०
॥४६॥

वितापश्चात्ततः॥ हंसः कृष्ण विषदारुक्षो गायत्र्या विशेषतः॥
एतन्मंत्रैश्च होतव्यं सहस्रान्न स्रयं संख्यया॥ देवतान्यपरिवां
शंभ्येनानामंत्रैश्च होमयेत्॥ ततः स्विष्टकृतं हुत्वा होमशेषं
समापयेत्॥ ततश्च बलिदानेन ग्रहपीडां व्यपोहतु॥ भोज्य
मात्रत्रये विप्रान् पायसं शर्करान्वितं॥ आचार्यं च जपि तातु
वस्त्राभरणैः सुगंधैः॥ त्रिंशत्कर्षं वा चोत्तमं च तु विंशतिमध्य
मा॥ कनिष्ठा विंशतिः कार्यं अर्घ्यं स्या दक्षिणा स्मृता॥ वस्त्रै
राभरणैः सम्यक् पूजिताय कुटुंबिने॥ दद्यात्स्वीति कृतिमानो
स्वेता गो दक्षिणा स्थले॥ दक्षिणां चलतो दद्यादात्मवित्तानुसा ॥४६॥
रतः॥ दद्यात्तस्मै ताम्रपात्रं सहिरण्यं प्रदापयेत्॥ श्रीपतांस्तग

वान्देवोमम संसारतारक। ब्राह्मणान्भोजयेत्पश्चात्द्वाद
शांनानिविस्तरैः। तेभ्यश्च दक्षिणां दद्या यथाविचानुसारतः।
॥पुष्पाण्याह। अर्कपुष्पैः सदारोग्यं मंदारैरर्थसंपदः।
तुलसीबिल्वपत्राणि जपापुष्प विशेषतः। आरक्तकरवीरै
श्च जपाबंधुकपाटलैः॥ अन्यैर्नानाविधैः रक्तैः कुसुमैस्तु
विचक्षणः॥ करवीरादि कुसुमैः रक्त चंदनमिश्रितैः॥ दूर्वांकु
रैरक्षतैश्च निक्षिप्तैः पत्रमध्यतः। शिरोरोगाक्षिरोगाणा
मित्यादिसर्वं विलिखितं। एवंरोगनाशाय आनुलोम्येनकुर्यात्
वैरीक्षयार्थं प्रातिलोम्येनकुर्यात्। अथ दक्षिणा अयुते व
युते एका गौः सार्द्धकारोदेया॥ कर्षलक्षणमाह। कर्षस्तु

त.वा.० ॥७९॥

षोडशासुवर्णाख्यः॥ अथवाषोडशमाषाख्यः॥ षोडशासुवर्णइति
चत्वारः सुवर्णकर्ष इति॥ अथ माषपरिमाणं॥ जालंतसूत्रमरीचस्थे
त्रसरेणुरजस्मृतः॥ तेष्टौ लिक्षा॥ तिस्रोलिक्षा। राजसर्षपः॥
तेषांयवः॥ कृष्णलातुः पंच॥ कृष्णलाः माषाः॥ इति॥ कृष्णलोगुंजा॥
यथोक्ते गोप्रदानाशक्तौ तन्मूल्ये न निष्कं॥ तदर्धं॥ तस्यार्धं वा
शक्त्या दद्यात्॥ गवामभावे निष्कं स्यात् तदर्धं पादमेव वा
ति मिताक्षरायां स्मरणात्॥ सुवर्णाश्चत्वारो निष्कः सुवर्णमा
नेतु प्रागुक्तं॥ ततोर्घ्यकल्परजनं॥ ज्ञापकानुद्दिजयेच्चादौव
स्त्रैराभरणैः कृषैः॥ तेभ्योर्घ्यकलशो दद्यात्ताम्रपात्रं सुनि
र्मलं॥ आसनं भोजनं चैव प्रतिमां चैव दापयेत्॥ ब्राह्मणा ॥७९॥
णाऊय संख्याद्वादशान्यतिवासरे॥ तेभ्यश्च दक्षिणां दद्यात्

यथावित्तानुसारतः॥ एवं यः कुरुते सम्यक् अर्घ्यदानं तु उत्त
मं॥ सर्वान्कामानवाप्नोति सूर्यलोके महीयते॥ अत्र होमः केचि
त्कुर्वन्ति तत्र मूलमंत्र गत्यं॥ आज्याः शतत्रयं विप्रान् पायसेन घृता
दिना॥ आचार्यं पूजयित्वा तु वस्त्रैराभरणैः शुभैः॥ विप्राय सू
र्यभक्ताय वैदिकाय विशेषतः॥ दद्यात् प्रतिकृतिं तस्मै मेता
मौ दक्षिणोच्यते॥ दद्यात्तस्मै ताम्रपात्रं हिरण्यं संप्रदापयेत्
प्रीयतां भगवानेवो मम संतानतारणं॥ ततो ब्राह्मणान्भोज
येत्॥ अर्घ्यफलं॥ ददाति परमां सिद्धिं मनसाभीप्सितं ध्रुवं॥
नीरोगं रोगविनाशाय कुष्ठमूलं रुजामपि॥ अपस्मारादि
भगानां भूतज्वरापनुत्तये॥ इत्यादीनां विनाशाय रोगा

णांप्रकटीकृतः॥ प्राप्नयेसर्वसिद्धीनांतत्त्वमंत्रोब्रवीमितः॥ कु
ष्ठेनापिसमाख्यातः शीघ्रपुत्रायकल्पते॥ कामजंक्रोधजंवा
पिमदजंदर्पजंतथा॥ सप्तजन्मकृतंपापंदहत्येवनसंशयः॥
दीर्घकुष्ठीत्वपस्मारीदरिद्रोवापियः पुमान्॥ सूर्यस्यारा
धनात्सद्योमुच्यतेनात्रसंशयः॥ महापापविनिर्मुक्तोकृत
कृत्योभविष्यति॥ एवंकुर्वन्नरोवापिदरिद्रोनचदुःखभाक्॥
उदररोगीमूत्ररोगीक्षयरोगीतथाक्षपात्॥ एतैःसर्वमहा
रोगीसर्वपापैःप्रमुच्यते॥ व्याधिभिर्मुच्यतेघोरैरपिजन्मां
तरार्जितैः॥ विनौषधैर्विनावैद्यैर्विनापथ्यपरिग्रहैः॥ नेत्र ॥४९॥
दुःखंशिरोदुःखंदुःखंचोदरसंभवं॥ आदित्यस्यार्घ्यदाने

ननश्यते नाचसंशयः॥ कालेन निधनं याति सूर्य लोके म
हीयते॥ ददु कुनखी कुष्टंगी गंडमालो विचर्चिका॥ शिरोरो
गो नेत्ररोगो सर्वव्याधिसमुद्भवः॥ एतैश्च सर्वरोगैश्च सर्व
पापैः प्रमुच्यते॥ गोहत्यां च सुरापानं ब्रंह्महत्यां व्यपोहति॥
आरोग्यं सुखिनं कुर्यात् पुत्रपौत्रसमन्वितः॥ अर्कस्य
मंडलं भित्वा ततो मोक्षमवाप्नुयात्॥ स्कांदे॥ दंडवत्र
त मयेत्स्मौ त्रयस्त्रिंशत्सहस्रकैः॥ महापाप महाव्याधिं
महारोग च नाशनं॥ आदित्यस्य नमस्कारं ये कुर्वंति दि
ने दिने॥ जन्मांतरसहस्रेषु दारिद्र्यं नोपजायते॥ महासो
रं पठेन्नित्यं नमस्कुर्यात्तु भास्करं॥ प्रणवादि चतुर्थ्यंते

द्वा॰
॥४९॥

नमस्कारसमन्वितं॥ प्रत्येकमुच्चरन्नर्घ्यं दद्यादर्घ्यादिवाक
रं॥ सूर्याभिवंदनं कुर्यात् उत्थायोत्थाय दंडवत्॥ प्रदक्षि
णां तु कुर्वीत पुरतः पृष्ठदर्शनात्॥ उरसा शिरसा दृष्ट्या
मनसा वचसा तथा॥ पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टांग
मुच्यते॥ भानुवारे कृष्णपक्षे सुनक्षत्रेषु गोचरे॥ सौरकर्म
प्रकुर्वीत सौम्यायां विशेषतः॥ प्रातिलोम्येनानुलोम्येन वी
जैः कुर्यात्समाहितः॥ एवमर्घ्यं महत्पुण्यं विशेषस्तु वि
चक्षणः॥ अर्घ्यपात्रे स्थितं तोयं प्राशयेन्नरोगनाशने॥
रोगस्थो मुच्यते रोगात् नात्र कार्या विचारणा॥ विप्रान्
द्वादशाशेष्याकान्नत्ताजये द्विवासरे॥ जेष्य क्षदक्षि ॥४९॥

न॰च॰ १०
॥५९॥

अनुष्टुप्

पुत्रः प्रस्कण्व ऋषिः। सूर्यो देवता। छंदः। तर्पणे विनियोगः॥
ॐ उद्यन्नद्य मित्रमहः। ॐ सूर्यं तर्पयामि॥ ॐ आरोहन्नु
त्तरां दिवं। ॐ सूर्यं त॰॥ ॐ हृद्रोगं मम सूर्य। ॐ सूर्यं त॰।
ॐ हरिमाणं च नाशय। ॐ सूर्यं॰॥ ॐ शुकेषु मे हरिमाणं। ॐ सूर्यं॰।
ॐ रोपणाकासु दध्मसि। ॐ सू॰। ॐ अथो हारिद्रवेषु मे। ॐ सू॰।
ॐ हरिमाणं नि दध्मसि। ॐ सू॰। ॐ उदगादयमादित्यः। सू॰। ॐ विश्वेन
सहसा सह। ॐ सू॰। ॐ द्विषंतं मह्यं रंधयन्। सू॰। ॐ मो अहं द्विषते रधं। ॐ सू॰।
अर्धर्चेन॥ ॐ उद्यन्नद्य मि॰ दिवं। ॐ सू॰। ॐ हृद्रोगं॰ शय। ॐ सू॰।
ॐ शुकेषु॰ दध्मसि। ॐ सूर्यं॰। ॐ अथो हा॰ नि दध्मसि। ॐ सू॰।
ॐ उदगा॰ सह। ॐ सूर्यं त॰॥ ॐ द्विषंतं॰ ते रधं। ॐ सूर्यं त॰॥ ॥५९॥

णां दद्यात्तच्चिरायुः सुखी भवेत्॥ ग्रंथांतरोक्ता दक्षिणा॥ उत्तमार्घे विंश
तिर्माषाः उत्तमा दक्षिणा स्मृता॥ षड्विंशाति मध्यमा स्यात् निष्क
विंशतिः स्मृता॥ अनेनैव विधानेन यथासंख्यानुसारतः। विंश
तिश्लोकं संप्रदान। महार्घे दक्षिणा प्रोक्ता कण्वादिमुनी
श्वरैः॥ अल्पार्घे दक्षिणा ज्ञेया क्रमेणैव विचक्षणैः॥ संतोषं का
रयेद्विप्रान् वस्त्रादिविविधानि च॥ आरोग्यं गृही सातेष्यश्च
महा
रोगमुक्तो न संशयः॥ ॥ अर्घ्यमंत्रोद्धारः॥ वृत्ते त्रिकोणं वृ
त्तेरक्तं कर्णिकां दत्त युग्मकं। वृत्तानाष्टदलं वाह्ये वृत्त
द्वादशपत्रकं। वृत्तं च षोडशं च द्वात्रिंशद्ब्रह्मणः पश्चिम।
र्ववियह हृदये वेद यंत्रराजमनुत्तमं। वृत्त मध्यमा साधिपं

इन्ना

त॰ चा॰
॥५०॥

त्रिकोणे त्रिबीजानि ॥ मं ह्रीं भं ॥ षट्कोणे षड्बीजानि ॥ ह्रां ह्रीं
ह्रूं ह्रैं ह्रौं ह्रः ॥ वृत्तयुग्मके वसुरुद्राश्च ॥ ध्रुवो धरश्च सोम
श्च आपश्चैवानिलोनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्र
कीर्तिताः ॥ वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः ॥ अजै
कपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चै
व कपाली च दिशांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रा ए
कादश स्मृताः ॥ अष्टपत्रेषु ॥ घृणिमंत्राक्षराणि ॥ द्वा
दशपत्रेषु द्वादशादित्याः ॥ षोडशपत्रेषु षोडशस्वराः ॥ ॥५०॥
द्वात्रिंशद्दलेषु प्रणवपूर्वकं उद्यन्नद्येति ऋङ्नामप्रतिपादकं
[illegible]

२

[illegible] पूर्वादिक्रमेण वेष्टयेत् ॥ प्रतिवर्णं स्वानुस्वारं
लिखेत् ॥ इति पूजायंत्रं ॥ अथार्घ्ययंत्रं ॥ अथ सर्वरो
गव्याधिनाशार्थं उद्यन्नद्येति ऋचाः पादार्धं चैतेन त
र्पणं कुर्यात् ॥ तत्रायं प्रकारः ॥ उद्यन्नद्येति ऋचेन यथो
क्तरक्तचंदनाक्षतरक्तकुसुमादिना सूर्यं षोडशोपचा
रैः संपूज्य पूजां ते पुनः उद्यन्नद्येति ऋचेन कृत्वा ताम्र
पात्रे पद्मं विलिख्य तत्र सूर्यं स्थापयित्वा ॥ एहि सूर्य सह
स्रांशो इति ध्यात्वा ताम्रपात्रे रक्तगंधाक्षतकरवीरार्क
कुसुमादिदूर्वातिलसहितैः ॥ ॐ उद्यन्नद्येति ऋचस्य कण्व

सूर्य धर्षयं॥ अथ पदस्तवेन। ॐ उद्घं न० वं। हृद्रो० त्राप। ॐ सू०॥
ॐ चन्द्रकेतु० सि। अथो० सि। ॐ सूर्य धं०। ॐ उदं० सह हृषं० रधं।
ॐ सू०॥ अथ साधर्चेन॥ ॐ उद्घं नद्य० दिवं। हृद्रो० य। चन्द्र
के० सि। ॐ सूर्यं०॥ ॐ अथो० सि। उदग० सह। हृषं० रधं।
ॐ सूर्यं०॥ अथ पदत्वेन। ॐ उद्घं० दिवं। हृद्रो० य। चन्द्रके०
धमसि। अथो० सि। उदं० सह। हृषं० रधं। ॐ सूर्यं तर्पया
मि। एवं तत्त्वेन पुनरपि हृ०॥ अथ पद्मकल्पत्रस्यापि प्र
योगस्य बाधानुसारेणाक्षरावृत्तिरप्येतत्स्वात्मि
त्याद्यावृत्तिकल्पनीया॥ अयं वत्त धर्षप्रकारो न केव
ल व्याधिमात्रहरः किंतु व्याधिनिर्मोचनं रेहिकामु

ट०बा०
॥५२॥

मिकफलावाप्तिर्भविष्यतीत्याह कैवल्यः ॥ इति अर्घ्यदा
नांगतर्पणसमाप्तं ॥ अथ मुद्रालक्षणं ॥ अथ मुद्राः
प्रवक्ष्यामि सर्वतंत्रेषु गोपिताः ॥ याभिर्विरचिताभिश्च
मोदंते मंत्रदेवताः ॥१॥ अर्चने जपकाले च ध्याने काम्ये
च कर्मणि ॥ स्नाने चावाहने शंखे प्रतिष्ठायां च रक्षणे ॥२॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिने ॥ स्थाने मु
सद्ध द्राः कैः इष्टव्याः स्वस्वलक्षणलक्षिताः ॥३॥ आवाह
नादिका मुद्रा नव साधारणा मताः ॥ तथा षडंग
मुद्राख्या सर्वमंत्रेषु योजिताः ॥ तत्र मालिनी लक्षणं ॥ ॥५२॥
कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरं ॥ तर्जनीमध्य

मानांग सहसा मुक्त न वर्जिताः ॥२॥ मुद्रैषा मालिनी प्रो
क्ता शंखस्योपरि चालिता ॥ अथ योनिमुद्रालक्षणं ॥ मिथः
कनिष्ठके बध्वा तर्जनीभ्यामनामिके ॥ अनामिकोर्ध्वसंश्लि श्लि
ष्टे दीर्घमध्यमयोरधः ॥१॥ अंगुष्ठद्वयन्यस्येयं योनिमु
द्रेयमीरिता ॥ अथ साधारणा नव ॥ हस्ताभ्यामंजलिं कृ
त्वा नामिकामूलपर्वणोः ॥ अंगुष्ठौ निक्षिपेत् सेयं मुद्रा क्षि
त्वावाहनी स्मृता ॥१॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रि
का स्मृता ॥ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात्संनिधाप
नी ॥२॥ अंतःप्रवेशितांगुष्ठा सैव संरोधनी मता ॥३॥ उ
त्तानमुष्टियुगला संमुखीकरणी मता ॥४॥ देवतांगे षडंगा

ए० चा० नांन्यासः स्यात्सकलाकृती॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुख
॥५३॥ तर्जनी॥ अवगुंठनमुद्रेयं मथितो स्त्रोमिता मता॥ अन्योन्या
भिमुखांगुष्ठकनिष्ठानामिके पुनः॥२॥ तथैव तर्जनीमध्य
धेनुमुद्रा समीरिता॥ अमृतीकरणं कुर्यात्तया साधक
सत्तम॥३॥ अन्योन्यग्रथितांगुष्ठप्रसारितकरांगुली॥ म
हामुद्रेयमुदिता परमीकरणे बुधैः॥४॥ प्रयोजयेदिमामुद्रा
देवताध्यानकर्मणि॥ अंगन्यासस्य मुद्रायाः सा सौ लक्ष
णमुच्यते॥५॥ अनंगुष्ठा ऋजवो हस्तशाखाः स्युर्हृन्मुद्रा हृ
दये शीर्षके च॥ अधोंगुष्ठा खलु मुष्टिः शिखायां करद्वंद्वा ॥५३॥
गुल्यो [illegible]ष्ठिः स्युः॥६॥ नाराचमुष्ट्यु[illegible]त बाहु मु

ग्मकांगुष्ठेत तर्जन्युदितो ध्वनिस्तु॥ विष्वग्विषक्तः कथितास्त्रमु
द्रायं त्राक्षिणी तर्जनिमध्यमे स्तः॥७॥ नेत्रद्वयं तत्र भवेद
नामा षडंगमुद्रा कथिता पयावतः॥ अंगन्यासमुद्रा एवं
वा त्रिंशच्छकद्राक त्रिद्विसंख्या मे गुली अविन्यसेत्॥ धे
नु ४ शंखस्तथा पद्मं गदा गरुडमेव च॥ चक्रं दयम पा
नीः च ग्रथित चाष्ट मुद्रिकाः॥८॥ आवाहन्यादिमुद्रास्तु क
थयामि तवानघ॥ उत्तानांगुलिमध्यः कुर्याद्दियमावाहनी
भवेत्॥१२॥ इयं तु विपरीता स्यात्तदा वै स्थापनी मता॥ अंत
र्मीलितांगुष्ठयुगले सन्निधापनरूपिणी॥१३॥ अंत
रंगुष्ठमुष्टिर्यो संनिरोधनरूपिणी॥ एतस्यपरमुद्रा

त्य का०
॥५८॥

प्रासार्द्धन्योसस्तैयदा ॥१४॥ [illegible] अंबुजमुद्रेयं त
र्जन्योस्सरलाकृतिः ॥ [illegible] कलीकरणं [illegible] नाम मुद्रेयं
व्याप्ति मुद्रया ॥१५॥ करावेष्ट्य च संयोज्या वारात्रिके मिदक्षि
णे ॥ परमीकरणं नाम मुद्रेयं तु ततः परं ॥१६॥ परिवर्त्य
करौ पश्चात्तर्जनी मध्यमे युगे ॥ कनिष्ठानामिकायुग्मं प
रस्पर युतं कुरु ॥१७॥ धेनुमुद्रेयमाख्याता अमृतीकर
णे भवेत् ॥ एता साधारणमुद्रा तु दर्शयित्वा ततः परं ॥१८॥
वरदाभयमुद्रा च वरसाभय वक्षि ये ॥ पुस्तकं च वामकरं
समं कुर्याच्चले प्रिये ॥१९॥ पुस्तकं नाम मुद्रेयं वाग्विज्ञा ॥५८॥
नं प्रपद्यति ॥ तर्जन्यंगुष्ठयुग्मेन दक्षहस्तेन पार्वति ॥२०॥

अक्षमालाख्यमुद्रेयं ज्ञानमुच्चैर्भवेत् ॥ मुष्टिबद्धा दक्ष
करे तर्जन्यं कुञ्चरूपिणी ॥२१॥ अंकुशाख्या महामुद्रा त्रै
लोक्य कर्षिणी भवेत् ॥ तर्जनीयुगलं देवी वामो दक्षे ख
लाकृति ॥२२॥ परामुद्रा समाख्याता वामहस्ते व्यवस्थिता ॥
यथाहस्तगला बाणाख्या हस्तं कुरु प्रिये ॥२३॥ बाण
मुद्रा समाख्याता ताभिः पुवर्गनिरुक्तिनी ॥ वामहस्ततले देवी
कपालाकृति कल्पयेत् ॥२४॥ कपालमुद्रा रचेन्द्रि देव्यानंदके
रीसदा ॥ हस्ताभ्यां कमलाकारो यदा तत्कमलं भवेत् ॥२५॥
इति वायुधमुद्रास्तु दर्शयित्वा वरानने ॥ प्राग्योनिमध्य
योन्यस्तु मध्यानिज मुरुंन्यसेत् ॥२६॥ विक्षेपमुद्रां देवि

त.चा.० दर्शयेत्सर्वसिद्धये ॥ परिवर्त्य करौ सम्यक् तर्जनीवाहनेस
॥५५॥ मे ॥२७॥ मध्यमे कुरु तन्मध्ये योजयेत्तदनंतरं ॥ अन्यो
न्यामिके देवी कनिष्ठे तु यथास्थिते ॥ अंगुष्ठाभ्यां योजि
ताभ्यां योन्याकारं च कारयेत् ॥२८॥ योनिमुद्रेयमाख्याता
परा त्रैलोक्यमातृका ॥ इयमेव हृदि क्षिप्ता त्रैलोक्यक्षो
भिणी भवेत् ॥२९॥ त्रैलोक्यद्राविणी नाम मुख्यस्था पर
मेश्वरी ॥ भ्रूमध्यस्था महादेवी त्रैलोक्याकर्षिणी भवे
त् ॥३०॥ ललाटस्था महेशानी त्रैलोक्यवशकारिणी ॥
ब्रह्मरंध्रे स्थिता देवी सर्वाल्हादकरी परा ॥३१॥ कनि ॥५५॥
ष्ठिकागते वामे दक्षांगुष्ठे विनिक्षिपेत् ॥ अन्योन्ययोग
तो देवी चक्रमुद्रेयमीरिता ॥३२॥ कनिष्ठांगुष्ठकौ सक्तौ क

रस्योरितरेतरं ॥ तर्जनीमध्यमानाम्याः संसक्ताः शुभ्रवर्जिताः ॥३३॥
मुद्रेषा गालिनी प्रोक्ता नवांबरस्थापरिचालिता ॥ ३४ ॥ ॥
॥ अथ सौरसूक्तमंत्राणामुक्तं ख्यामृषिदैवतछंदांस्यनुक्र
मिष्यामः पूर्वाचार्यैः क्रमेणैव तु सुरादृष्ट्वा शौनकादिभिराचार्यै
र्जपतां तु प्रत्येकशो र्थसिद्धानीतन्मया च्यते मृत्युव्याधिं कुष्ठा
पस्मारादि हृद्रोग व्रण दद्रु गुल्म मूत्रगुदार्श क्षयो पिता खंजलो
दरभगंदरैः पांडुरोगे लूतादि विस्फोट कमजीर्णज्वर रात्रिशिरोरोग
प्रमेहाद्यः सर्वैर्व्याधिभिर्ग्रस्तापन्म मइह जन्मनि जन्मांतरकृत
महापातकोपपातक समस्तपापक्षयद्वारा श्री सविता सूर्य
नारायणप्रीत्यर्थे महासौरजपे विनियोगः ॥ उदुत्यमिति त्रयो

त॰ पा॰
॥ ५६ ॥

दशर्चस्य सूक्तस्य। कण्वपुत्रः प्रस्कण्व ऋषिः सूर्यो देवता।
नवाद्या गायत्री छंदः। अंत्यास्तिस्रोनुष्टुभः। अंत्यास्तिस्रो रो
गघ्नः। उपनिषद्द्वयोर्द्विषघ्नः। सूर्योपस्थाने मंत्रजपे वि
नियोगः॥ चित्रं देवानामिति षडर्चस्य सूक्तस्य। आंगिर
सः कुत्स ऋषिः सूर्यो देवता त्रिष्टुप् छंदः। सूर्योपस्थाने म॰
उद्वयमित्यनयोर्द्वयोः। औचथ्यपुत्रो दीर्घतमा ऋषिः।
सूर्यो देवता। त्रिष्टुप्छंदः। सूर्योप॰। हंसः शुचिषदित्य
स्य। गोतमपुत्रो वामदेव ऋषिः। सूर्यो देवता। जगती ॥ ५६ ॥
छंदः। सूर्यो देव॰ पतोस्य चस्य। भौमिपुत्रोत्रि ऋषिः।
पंतिमं

। सूर्यो देवता। अनुष्टुप्छंदः। सूर्योप॰। यदद्येत्यस्य मंत्रस्य
। मैत्रावरुणपुत्र वसिष्ठ ऋषिः सूर्यो देवता त्रिष्टुप्। सूर्योप॰।
उत्सूर्यो बृहदित्यस्य मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप् सू॰।
उद्वेति चतस्रोर्धर्चस्य। मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप् सूर्यो॰।
उदु त्यदित्यस्य मैत्रावरुणो वसिष्ठः सूर्यो बृहती॥ सूर्योप॰।
मैत्रावरुणो वसिष्ठः सूर्यो भूरीशाः... रिति सतो बृहती।। तच्चक्षुरित्यस्य मैत्राव
णो वसिष्ठः सूर्यः पुरउष्णिक्। सूर्योप॰। बण्महाँ असीत्यनयो
योः भृगुपुत्रो जमदग्निऋषिः सूर्यो देवता त्रिष्टुप्। सूर्योप॰।
नमो मित्रस्येत्यस्य। द्वादशर्चस्य सूक्तस्य। सूर्यपुत्रोभित

तू॰वा॰
॥५७॥

पात्‌ ऋषिः। सूर्यो देवता। जगती छंदः। मंत्रोपनेति त्रिष्टुप्‌। सू॰
सूर्यो नो दिवस्पात्विति पंचर्चस्य सूर्यपुत्रश्चक्षुर्ऋषिः।
सूर्यो देवता। गायत्री छंदः। सूर्यो॰। विभ्राड्बृहदित्यस्य
सूक्तस्य सूर्यपुत्रो विभ्राड्‌ ऋषिः। सूर्यो देवता। जगती।
अंत्या प्रस्तारपंक्तिः सूर्योप॰। आयंगौरिति तृचस्य सू॰
क्तस्य। स्व यं पतः सार्पराज्ञि ऋषिः। सूर्यो देवता। गायत्री छंदः।
सूर्योपस्थाने समस्तजपे विनियोगः॥ षष्ठि सूक्ताध्याये चैताः
एतासां सूर्य एव देवता। केचिदत्र सूक्तमात्मनःस्तवं म
न्यंते। यत्‌ ऋषिः सोऽहमिति ध्यातव्यं। य एतेन सूक्तेन सूर्य
महरहरुपतिष्ठंते। आयुष्मंतः आरोग्यवंतो रयिवंतो ॥५७॥

बलवंतो बहुपुत्रवंतः सूक्ष्मिवंतः पुष्टिवंतः प्रजाकामः पशुकामः
श्रीकामः शांतिकाम आरोग्यकाम एवं भास्करस्याराधनं कुर्यात्‌॥
महापातकी पापक्षयार्थी व्याधिविमोचनार्थी पुत्रार्थी मोक्षार्थी
च कुर्वीत सूर्यस्यैव सायुज्यं सलोकतामश्नुते नमः शौनकाय नम॰
शौनकाय। नमः परमऋषिभ्यो नमः परमऋषिभ्यः॥ नमः स
वित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे। त्रयीमयाय
त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने नमः॥ सूर्यमंड
लमध्यस्थं सांबसंसारभेषजं। नीलग्रीवं विरूपाक्षं नमामि
शिवमव्ययं॥ ॥ इति छंदोर्षिदैवतं समाप्तं। इति ऋग्विधानं संपूर्णं॥
॥७॥ श्रीशौनकऋषिणा प्रोक्तं तवाकन्यसारं समाप्तं॥ ॥७॥
शौनकानुमतेन
॥५८॥

८४
८

लेख क्र ११८

X

॥ इदं म [illegible]
॥ [illegible] ॥

इति

तृचाविधानम्